www.rajteachers.com

रञ्जिनी

(प्रथमो भागः)

कक्षा 6



राजकीय विद्यालयों में निःशुल्क वितरण हेतु

राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर

प्रकाशक

राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर

संस्करण : 2016

© राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर
© राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर

मूल्य :

पेपर उपयोग : आर. एस. टी. बी. वाटरमार्क
80 जी. एस. एम. पेपर पर मुद्रित

प्रकाशक : राजस्थान राज्य पाठ्यपुस्तक मण्डल
2–2 ए, झालाना डूंगरी, जयपुर

मुद्रक :

मुद्रण संख्या :

सर्वाधिकार सुरक्षित

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलैक्ट्रानिकी, मशीनी, फोटोप्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।

- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाऐगी।

- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

- किसी भी प्रकार का कोई परिवर्तन केवल प्रकाशक द्वारा ही किया जा सकेगा।

पाठ्यपुस्तक निर्माण
वित्तीय सहयोगः
यूनिसेफ राजस्थान, जयपुर

आमुखम्

गतिमाने वातावरणे परिवर्तनम् आवश्यकं भवति, तेनैव विकासस्य गतिः तीव्रा भवति। विकासे अनेकानि तत्त्वानि महत्त्वपूर्णानि तेषु शिक्षा अतीव महत्त्वपूर्णं तत्त्वमस्ति। विद्यालयिशिक्षां प्रभावशालिनीं कर्तुं पाठ्यचर्यायां समये-समये परिवर्तनम् आवश्यकम्। वर्तमानकाले राष्ट्रियपाठ्यचर्यायाः आलेखः २००५ तथा च निःशुल्क-अनिवार्य-बालशिक्षा-अधिकाराधिनियमः २००९ एतद्द्वारा इदं स्पष्टं यद् अखिलशिक्षणस्य केन्द्रे बालकः एव प्रधानः भवति। अस्माकं शिक्षणप्रक्रिया एवं भवेत् यत् बालकः स्वयमेव अधिगमं कुर्यात्। अधिगमप्रक्रियायां बालकः स्वतन्त्ररूपेण शिक्षेत्, शिक्षकस्तु केवलं सहयोगी भवेत्। पाठ्यचर्यां वास्तविकरूपेण छात्रः प्राप्नुयात् एतदर्थं पाठ्य-पुस्तकं महत्त्वपूर्णं साधनम् अस्ति। परिवर्तमानायाः पाठ्यचर्यायाः सन्दर्भे पाठ्यपुस्तकेषु परिवर्तनं करणीयं भवति। अतएव राज्यसर्वकारेण नवीनं पाठ्यपुस्तकं निर्मितम्।

पाठ्यपुस्तकं सुगमं, रुचिपूर्णं, सुग्राह्यम् आकर्षकञ्च भवेत् येन बालकः सरलभाषया, विषयवस्तुनः चित्राणां, विभिन्नगतिविधिमाध्यमेन उपलब्धं ज्ञानं हृदयङ्गमं कर्तुं शक्नोति इति अवधानं पाठ्यपुस्तकनिर्माणे आवश्यकरूपेण कृतम्। छात्रः स्वसामाजिकेन, स्थानीयपरिवेशेण सम्बद्धानि ऐतिहासिक-सांस्कृतिक-संवैधानिकमूल्यानि प्रति स्वमनसि ज्ञानं निष्ठां च धारयन् सुसभ्यनागरिकरूपेण आत्मानं समाजे स्थापितुं शक्नोति।

शिक्षकेभ्यः मम विशेषाग्रहः यत् एतद्पुस्तकं न केवलं पाठ्यक्रमं पूरयितुं भवेद्, अपितु एतद्पुस्तकं स्वानुभवञ्च आधारीकृत्य छात्रम् विषयशिक्षणस्य उद्देश्यानि प्राप्त्यर्थम् अधिकाधिकानि अवसराः दद्यात्।

राजस्थान-राज्य-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-संस्थानम् उदयपुरम् पाठ्यपुस्तकानां विकासे सहयोगार्थं तान् सर्वान् संस्थानानि, सङ्गठनानि, लेखकान्, प्रकाशकाञ्च प्रति आभारम् अभिव्यनक्ति, ये पाठ्यपुस्तकानां निर्माणे, सामग्रीप्रदाने चयने च सहयोगं दत्तवन्तः। एषु NCERT राज्यसर्वकारः, विभिन्नाः राजकीयविभागाः, संस्थानानि, समाचारपत्राणि, पत्रिकाः, वेबसाइट सहैव संस्कृतभारती, विद्याभारती, सम्भाषण-सन्देशः इत्यादयः आभारयोग्याः सन्ति। सावचेतेऽपि यदि केषां लेखकानां, प्रकाशकानां संस्थानानां, सङ्गठनानां, वेबसाइट इत्यस्य च नामानि नोल्लिखितानि तदपि तेषां आभारि भवद् क्षमाप्रार्थि अस्ति। तेषां नामानि ज्ञाते सति आगामी संस्करणेषु तेषां नामानि अपि योजयिष्यन्ते।

पाठ्यपुस्तकानां गुणवत्तां वर्धयितुं प्रारम्भिकशिक्षाशासनसचिवं श्रीमन्तं कुञ्जीलालमीणां,

माध्यमिकशिक्षाशासनसचिवं राष्ट्रियमाध्यमिकशिक्षापरिषद्-आयुक्तं च श्रीमन्तं नरेशपालगंगवारं, प्रारम्भिकशिक्षानिदेशकं श्रीमन्तं बाबूलालमीणां, माध्यमिकशिक्षानिदेशकं श्रीमन्तं सुवालालं, राजस्थानप्रारम्भिकशिक्षापरिषद्-आयुक्तं श्रीमन्तं बी.एल. जाटावतं प्रति हृदयेन आभारमभिव्यनक्ति। येषां अमूल्यैः परामर्शैर्मार्गदर्शनैश्च पुस्तकमिदं गरीयः श्रेयः च भवितुं शक्तं जातम्।

अस्य पाठ्यपुस्तकस्य निर्माणं संयुक्तराष्ट्र-बालकोषस्य (UNICEF) वित्तीय सहयोगेन अभवत्। संस्थानं संयुक्तराष्ट्र-बालकोषस्य राजस्थानप्रमुखः सेम्युअल एमं., शिक्षा-विशेषज्ञा डॉ. सुलग्ना रायं बालकोषस्य सम्बद्ध-अधिकारिणः च प्रति आभारं प्रदर्शयति येषां सहयोगं विना कार्यमिदं सफलतां न गतं स्यात्। संस्थानं सर्वाधिकारिणाम् कार्मिकाणां च ये अस्मिन् कार्यसम्पादने प्रत्यक्ष-अप्रत्यक्ष रूपेण सहयोगं कृतवन्तः तेषां प्रशंसां करोति।

माम् एतद्पुस्तकं भवताम् हस्तेषु समर्पयन् अतीवप्रसन्नता भवति। आशासे एतद् पाठ्यपुस्तकं न केवलं छात्रेभ्यः शिक्षकेभ्यश्च उपयोगि भविष्यति अपितु प्रभावशालि अपि भविष्यति।

विचाराणां परामर्शाणां समादरः लोकतन्त्रस्य वैशिष्ट्यम्। अतः राजस्थान-राज्य-शैक्षिक-अनुसन्धान एवं प्रशिक्षण-संस्थानम् उदयपुरम् सर्वदा एतद् पुस्तकं गुणवत्तापूर्णं कारयितुं भवतां विमर्शाणां स्वागतं करिष्यति।

निदेशकः

राजस्थान राज्य शैक्षिक अनुसंधान
एवं प्रशिक्षण संस्थानम्, उदयपुरम्

पाठ्यपुस्तक निर्माण समिति

संरक्षक : विनीता बोहरा, निदेशक, एस. आई. ई. आर. टी., उदयपुर।

मुख्य समन्वयक : नारायण लाल प्रजापत, उपनिदेशक प्रभारी पाठ्यपुस्तक निर्माण, एस. आई. ई. आर. टी. उदयपुर।

समन्वयक : डॉ. नर्बदाशंकर श्रीमाली, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

लेखक / सम्पादक समूह :

डॉ. शक्ति कुमार शर्मा 'शकुन्त' से. नि. सहाचार्य ज.ना.रा.वि., उदयपुर । (संयोजक)

डॉ. सुरेश चन्द्र गोयल, व. व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

शारदा स्वामी, वरिष्ठ व्याख्याता, डाईट, जोधपुर

विक्रम शर्मा, प्रधानाचार्य, सरस्वती विद्या मंदिर उ.मा.वि., मंडिया रोड, पाली

दुर्गाशंकर पारीक, उपनिरीक्षक संस्कृत शिक्षा, अजमेर संभाग, अजमेर

गायत्री जोशी, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

ब्रजबाला भटनागर, से. नि. व्याख्याता, एस.आई.ई.आर.टी.,उदयपुर

डॉ. प्रमोद कुमार वैष्णव, व्याख्याता, रा. महाविद्यालय, कोटा

राजेन्द्र कुमार शर्मा, व्याख्याता, राजकीय उ. मा. विद्यालय, देईखेड़ा, बूंदी

परमानन्द शर्मा, व्याख्याता, रा.उ.मा.वि., आंगुचा, भीलवाड़ा

डॉ. आशुतोष पारीक, व्याख्याता, सनातन धर्म रा. महा., ब्यावर, अजमेर

द्वारका लाल चौबदार, व्याख्याता, डाईट, कोटा

डॉ. माधवेश्वर चौधरी, व्याख्याता, रा.वरि. उपा. संस्कृत वि., तीतरिया, जयपुर

डॉ. प्रवीण पण्ड्या, व्याख्याता, आदर्श राजकीय उ. मा. वि., सांचोर, जालोर

संयम प्रकाश जैन, व्याख्याता, रा. उ. मा. वि., हरमाड़ा, जयपुर

रविशंकर शर्मा, व्याख्याता, रा. उ. मा. वि., आदर्श नगर, जयपुर

रामप्रसाद शर्मा, प्र. अ. रा. मा. विद्यालय, पचीपल्या सवाईमाधोपुर

लादूराम सीरवी, प्र. अ. आ. वि. मं. मा., ब्यावर, अजमेर

गगेन्द्रसिंह आर्य, प्र.अ. आदर्श विद्यामन्दिर मा. वि. रामगढ़, जैसलमेर

निःशुल्क वितरण हेतु

		बलदेव कुमार, प्र.अ., आदर्श विद्या मन्दिर माध्यमिक, आबूरोड, सिरोही
		दुर्गसिंह पंवार, व. अ. हनवन्त आदर्श वि. मं.उ.मा. लालसागर, जोधपुर
		मधुसूदन शर्मा, व.अ., राजकीय आदर्श उ.मा. विद्यालय, सावर, अजमेर
		डॉ. अनीता अग्रवाल, अध्यापिका रा. उ. प्रा. वि., मानसरोवर, जयपुर
		श्रवणकुमार विश्नोई, अ. हनवन्त आ.विद्या मन्दिर उ.मा. लालसागर, जोधपुर
		पवन कुमार राजोरा, अध्यापक, रा. उ. प्रा. वि., कोशीथल, भदेसर, चित्तौड़गढ़
		श्रवण कुमार त्रिवेदी, अध्यापक आ. विद्या मन्दिर, माध्यमिक, सुमेरपुर, पाली
आवरण एवं साज-सज्जा	:	डॉ. जगदीश कुमावत, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।
चित्रांकन	:	डॉ. राजेन्द्र कुमार वैरागी, व्याख्याता, रा. महात्मा गाँधी उ.मा.वि., रामपुरा, कोटा
		गोपाल लाल नाराणीवाल,अध्यापक, रा.प्रा.वि. बुथेल, कुराबड़, उदयपुर
तकनीकी सहयोग	:	हेमन्त आमेटा, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।
	:	अभिनव पण्ड्या, क.लि., एस. आई. ई. आर. टी., उदयपुर।
कम्प्यूटर ग्राफिक्स	:	अविनाश कुमावत, शब्द संसार, जयपुर
		गोपाल लोहार, प्रेमलता लोहार, हरिश रावत

शिक्षकेभ्यः

कस्य अपि विषयस्य शिक्षणसाफल्याय अध्यापकाः एव आधारभूताः सन्ति। पुस्तकपाठनकाले निम्नबिन्दून् प्रति अध्यापकाः अवधानं दद्युः इति अपेक्षा वर्तते।

१. संस्कृतशिक्षणं षष्ठीकक्षात् प्रारभ्यते। अतः छात्रेभ्यः संस्कृतध्वनिनां श्रवणस्य ग्रहणस्य च पर्याप्तः अवसरो देयः। अस्य कृते सुभाषितानां, संवादानां च माध्यमेन कक्षायाः वातावरणं संस्कृतमयं कुर्यात्।

२. पुस्तकं संस्कृतमाध्यमेन पाठयेयुः इति सर्वकारस्य अस्माकं च मनीषा वर्तते । अतः अध्यापकाः सरलसंस्कृत माध्यमेन, चित्रमाध्यमेन प्रतिकृतिमाध्यमेन, क्रियामाध्यमेन, प्रश्नोत्तरमाध्यमेन विषयवस्तु स्पष्टं कारयेयुः।

३. श्लोकस्य पाठसमये उचित-गति-लय-आरोह-अवरोहेषु ध्यानम् अपेक्षितं वर्तते। श्लोकानां गानं वैयक्तिकरूपेण सामूहिकरूपेण च कारयितुं शक्यते।

४. संवादपाठानां अभिनयं कारयित्वा पाठयेयुः।

५. कथापाठानां पाठनकाले आरम्भे सम्पूर्ण-कथायाः सारं श्रावयित्वा क्रमशः प्रत्येकं पंक्तिः प्रश्नोत्तरमाध्यमेन स्पष्टं कारयतु।

६. योग्यताविस्तारमध्ये समागतान् नियमान् अधिक-उदाहरणैः स्पष्टेयुः।

७. समकालिक-सांस्कृतिक-वातावरणं दृष्ट्वा ज्ञानस्य सततं विकासं कुर्यात्। निरन्तरं तेषां मूल्याङ्कनञ्च भवेत्। अस्मिन् सन्दर्भे क्रियात्मक-गतिविधयः, क्रीडामञ्चनं, परियोजना, ज्ञानस्य सङ्कलनम् इत्यादिप्रायोगिक-गतिविधिभिः शिक्षणं आनन्ददायि सरसं च भवेत् इत्यपि अवधेयम्। अभिभावकाः अपि छात्राणां योग्यताविकासाय अवधानं दद्युः शिक्षकाणां च सहयोगं कुर्युः।

निःशुल्क वितरण हेतु

अनुक्रमणिका

पाठक्रमाङ्कः	पाठस्य नाम	पृष्ठसंख्या
प्रथमः पाठः	मङ्गलाचरणम्	१
द्वितीयः पाठः	अकारान्त-पुँल्लिङ्गशब्दप्रयोगः	६
तृतीयः पाठः	आकारान्त-स्त्रीलिङ्गशब्दप्रयोगः	१५
चतुर्थः पाठः	अकारान्त-नपुंसकलिङ्गशब्दप्रयोगः	२४
पंचमः पाठः	सर्वनाम-शब्दप्रयोगः (एतत्-तत्-किम्)	३४
षष्ठः पाठः	सर्वनाम-शब्दप्रयोगः (अस्मद्-युष्मद्)	४६
सप्तमः पाठः	भारतभक्ताः	५४
अष्टमः पाठः	पुनः मूषकः भव	५८
नवमः पाठः	आदर्शविद्यालयः	६३
दशमः पाठः	संख्याज्ञानम्	७१
एकादशः पाठः	किं श्रेष्ठम् ?	७९
द्वादशः पाठः	सुभाषितानि	८८
त्रयोदशः पाठः	गणतन्त्रदिवसः	९४
चतुर्दशः पाठः	आम्लं द्राक्षाफलम्	१०१
पंचदशः पाठः	रघोः उदारता	१०७
षोडशः पाठः	सूक्तयः	११२
परिशिष्टम्	कारक-परिचयः, शब्दरूपाणि, धातुरूपाणि संस्कृतशब्दावलिः, इमानि अपि अवलोकयत	११७

प्रथमः पाठः १

मङ्गलाचरणम्



सरस्वति! नमस्तुभ्यं, वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि, सिद्धिर्भवतु मे सदा ।। १।।

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव-देव ।। २।।

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत् ।। ३।।

भावार्थः

१. हे वरदायिनि ! हे इच्छारूपिणि सरस्वति ! तुभ्यं नमः । अहं विद्यायाः आरम्भं करिष्यामि । अस्यां विद्यायां सदा मम कृते पूर्णतायाः प्राप्तिः भवतु ।

२. हे ईश्वर ! त्वम् एव माता असि, त्वम् एव पिता असि । त्वम् एव बन्धुः असि, त्वम् एव सखा असि। त्वम् एव विद्या असि, त्वम् एव धनम् असि । हे देवाधिदेव ! त्वम् एव मम सर्वस्वम् असि।

३. सर्वे प्राणिनः सुखिनः भवन्तु, सर्वे नीरोगाः भवन्तु, सर्वे कल्याणं पश्यन्तु, कोऽपि प्राणी दुःखी न भवेत्।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
सरस्वति !	हे शारदे !	हे सरस्वती ! (सम्बोधन)
नमस्तुभ्यम्	तुभ्यं नमः	तुम्हें नमस्कार
वरदे !	वरदायिनि !	हे वर देने वाली !
कामरूपिणि !	इच्छारूपिणि !	हे इच्छारूपिणी !
विद्यारम्भम्	विद्यायाः आरम्भम्	विद्या का आरम्भ
करिष्यामि	विधास्यामि	करूँगा
सिद्धिर्भवतु	पूर्णता भवतु	पूर्णता हो
मे	मम	मेरी (मुझे)
सदा	सर्वदा	हमेशा
बन्धुः	सम्बन्धी	सम्बन्धी
सखा	मित्रम्	मित्र
द्रविणम्	धन-ऐश्वर्यादिकम्	धन-सम्पत्ति
सर्वम्	सर्वस्वम्	सब कुछ
मम	मे	मेरा
देव-देव !	देवानां देव !	हे देवों के देव !
सर्वे	सर्वे (प्राणिनः)	सभी (प्राणी)
भवन्तु	सन्तु	हो/होवें
सुखिनः	सुखयुक्ताः	सुखी
निरामयाः	रोगरहिताः	नीरोगी
भद्राणि	कल्याणानि	कल्याण

पश्यन्तु	अवलोकयन्तु	देखें
मा	न	नहीं
कश्चिद्	कोऽपि	कोई
दु:खभाग्	दु:खी	दु:ख का भागी
भवेत्	भवितव्य:	हो

अभ्यास:

(१) उच्चारणं कुरुत -

सरस्वति !	नमस्तुभ्यम्	कामरूपिणि !	विद्यारम्भम्
सिद्धिर्भवतु	त्वमेव	बन्धुश्च	द्रविणम्
निरामया:	भद्राणि	कश्चिद्	दु:खभाग्

(२) मञ्जूषात: उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

द्रविणं माता कश्चिद् सरस्वति ! सुखिन:

(क) ..... नमस्तुभ्यम् ।

(ख) त्वमेव ..... च पिता त्वमेव ।

(ग) त्वमेव विद्या ..... त्वमेव ।

(घ) सर्वे भवन्तु ..... ।

(ङ) मा ..... दु:खभाग् भवेत् ।

(३) परस्परं सुमेलयत -

(क)	विद्यारम्भं	सखा त्वमेव
(ख)	त्वमेव बन्धुश्च	पश्यन्तु
(ग)	त्वमेव सर्वं	करिष्यामि
(घ)	सर्वे सन्तु	मम देव-देव ।
(ङ)	सर्वे भद्राणि	निरामया: ।

अध्यापकाय निर्देश: -

- अध्यापक: प्रदत्तश्लोकानां सस्वरवाचनं कारयेत् ।
- श्लोकानां कण्ठस्थीकरणं कारयित्वा छात्रान् प्रार्थनासभायां प्रस्तोतुं प्रेरयेत् ।

योग्यता-विस्तारः

१. प्रियाः छात्राः ! प्रथमे पाठे वयम् ईश्वरस्य स्मरणं कृतवन्तः । यथा वयं पुस्तकस्य आरम्भे ईश्वरस्य स्मरणं कुर्मः तथा एव दिनस्य आरम्भे अपि ईश्वरस्य स्मरणार्थं करतलदर्शनेन सह एनं श्लोकं वदामः-

कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती ।
करमूले तु गोविन्दः, प्रभाते करदर्शनम् ।।



२. भूमिः अस्माकं माता अस्ति किन्तु वयं प्रतिदिनम् अस्याः उपरि चलामः, पादाभ्यां स्पर्शं कुर्मः । अतः क्षमायाचनार्थं प्रातः काले एनं श्लोकं वदामः -

समुद्रवसने! देवि! पर्वतस्तनमण्डले!
विष्णुपत्नि! नमस्तुभ्यं, पादस्पर्शं क्षमस्व मे ।।



अध्यापकाय निर्देशः -

। अध्यापकः बालकैः एतयोः श्लोकयोः सस्वरं गायनं कारयेत् । श्लोकानां भावविषये अपि चर्चां कुर्यात् ।

वर्ण-विलासः

हिन्दीभाषायाः वर्णमालां भवन्तः पूर्वकक्षासु पठितवन्तः । यथा - हिन्दीभाषायाः वर्णमाला भवति, संस्कृतभाषायाः वर्णमाला अपि प्रायशः तथा एव भवति । आगच्छन्तु संस्कृतवर्णमालां जानीमः -

संस्कृत-वर्णमाला

स्वराः

अ	आ	इ	ई	उ	ऊ	ऋ
ॠ	ऌ	ए	ऐ	ओ	औ	

व्यञ्जनानि

स्पर्शवर्णाः →


क्	ख्	ग्	घ्	ङ्
च्	छ्	ज्	झ्	ञ्
ट्	ठ्	ड्	ढ्	ण्
त्	थ्	द्	ध्	न्
प्	फ्	ब्	भ्	म्

अन्तःस्थवर्णाः → य् र् ल् व्

ऊष्मवर्णाः → श् ष् स् ह्

चिह्नानि → : (विसर्गः) ं (अनुस्वारः) ् (हलन्तः)

अक्षराणि योजयतु चित्रं रचयतु




द्वितीयः पाठः २

अकारान्त-पुँल्लिङ्गशब्दप्रयोगः



गणेशः



सूर्यः




चन्द्रः



वृक्षः




मेघः




पर्वतः




मयूरः



कपोतः



काकः




शुकः




हंसः




कुक्कुटः




सिंहः




गजः




भल्लूकः




उष्ट्रः




अश्वः



वृषभः



हरिणः



गर्दभः



मेषः



बिडालः




मूषकः



सर्पः




मीनः



मकरः




मण्डूकः



कच्छपः



शशकः



कुक्कुरः



अध्यापकः




छात्रः



कृषकः



चिकित्सकः



सौचिकः




रजकः



सैनिकः



कुम्भकारः



क्रीडकः




विद्यालयः




आपणः



देवालयः



घटः



चमसः



कंसः

वचन-प्रयोगः




बालकः




बालकौ




बालकाः




गजः



गजौ



गजाः



कपोतः



कपोतौ



कपोताः



सैनिकः



सैनिकौ




सैनिकाः



वृक्षः



वृक्षौ



वृक्षाः

क्रिया-प्रयोगः




बालकः पठति।




बालकौ पठतः।



बालकाः पठन्ति।




शशकः खादति।




शशकौ खादतः।




शशकाः खादन्ति।



छात्रः क्रीडति।



छात्रौ क्रीडतः।




छात्राः क्रीडन्ति।


गजः चलति।	गजौ चलतः।	गजाः चलन्ति।
अश्वः धावति।	अश्वौ धावतः।	अश्वाः धावन्ति।
कृषकः गच्छति।	कृषकौ गच्छतः ।	कृषकाः गच्छन्ति ।
अध्यापकः आगच्छति ।	अध्यापकौ आगच्छतः।	अध्यापकाः आगच्छन्ति।
रजकः क्षालयति।	रजकौ क्षालयतः।	रजकाः क्षालयन्ति।

अभ्यासः


१. चित्रं दृष्ट्वा नाम लिखत -


.....


.....


.....



.....



.....




.....

२. चित्रं दृष्ट्वा उचितं वचनप्रयोगं कुरुत-


गजः


.....


.....


.....


मयूरौ


.....


.....


.....


छात्राः

३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत -



बालकाः ..... ।



शशकः ..... ।



अश्वौ ..... ।

४. उदाहरणानुसारं रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-	सूर्यः	सूर्यौ	सूर्याः
	काकः	.....	.....
	.....	शुकौ	.....
	.....	.....	वृषभाः
	घटः	.....	.....
	.....	मेघौ	.....
	.....	.....	चिकित्सकाः

५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-	पठति	पठतः	पठन्ति
	लिखति	.....	.....
	.....	.....	आगच्छन्ति
	.....	खादतः	.....
	धावति	.....	.....
	.....	गच्छतः	.....
	.....	.....	क्रीडन्ति

६. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत-

(क) ..... खादन्ति। (कपोतः/कपोतौ/कपोताः)

(ख) ..... आगच्छति। (चिकित्सकः/चिकित्सकौ/चिकित्सकाः)

(ग) ..... पठतः। (बालकः/बालकौ/बालकाः)

(घ) ..... क्रीडति। (क्रीडकः/क्रीडकौ/क्रीडकाः)

(ङ) ..... धावन्ति। (हरिणः/हरिणौ/हरिणाः)

७. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत-

(क) अध्यापकौ .....। (गच्छति/गच्छतः/गच्छन्ति)

(ख) रजकाः .....। (क्षालयति/क्षालयतः/क्षालयन्ति)

(ग) छात्रः .....। (क्रीडति/क्रीडतः/क्रीडन्ति)

(घ) कृषकौ .....। (चलति/चलतः/चलन्ति)

(ङ) मूषकः .....। (धावति/धावतः/धावन्ति)

८. प्रदत्त-पदानुसारं चित्रनिर्माणं कुरुत-

सूर्यः	वृक्षः
घटौ	चमसाः

योग्यता-विस्तारः

१. ध्यानेन पठत अवगच्छत च-

र् + आ + म् + अ = राम (राम + : = रामः)

ब् + आ + ल् + अ + क् + अ = बालक (बालक + : = बालकः)

म् + अ + य् + ऊ + र् + अ = मयूर (मयूर + : = मयूरः)

२. एते सर्वे पुँल्लिङ्गशब्दाः ।एतेषाम् अन्ते 'अ' (अकारः) अस्ति, अतः एते अकारान्त-पुँल्लिङ्गशब्दाः सन्ति।

येषां पुँल्लिङ्गशब्दानाम् अन्ते अकारः भवति, ते अकारान्त-पुँल्लिङ्गशब्दाः भवन्ति। यथा- रामः, बालकः, कपोतः इत्यादयः।

अवधेयम् →

संस्कृते त्रीणि लिङ्गानि भवन्ति -

1. पुँल्लिङ्गम् 2. स्त्रीलिङ्गम् 3. नपुंसकलिङ्गम्

संस्कृते त्रीणि वचनानि भवन्ति -

1. एकवचनम् 2. द्विवचनम् 3. बहुवचनम्

३. भवतां कक्षायां कुटुम्बे वा येषां नामानि अकारान्तपुँल्लिङ्गे सन्ति, तेषां नामानि लिखन्तु ।

वर्ण-विलासः

ध्यानेन पठत-

यथा - गजः = ग् + अ + ज् + अ + :
(ग् + अ = ग, ज् + अ + : = जः)

स् + ऊ + र् + य् + अ + : = सूर्यः

ह् + अ + र् + इ + ण् + अ + : = हरिणः

अ + ध् + य् + आ + प् + अ + क् + अ + : = अध्यापकः

प् + अ + ठ् + अ + न् + त् + इ = पठन्ति

- गणेशः, मूषकः, मयूरः, धावति, क्रीडन्ति एतेषां पदानाम् अपि वर्णविच्छेदं कुरुत।

तृतीयः पाठः ३

आकारान्त-स्त्रीलिङ्गशब्दप्रयोगः



दुर्गा



छात्रा



अध्यापिका



वृद्धा



बालिका



पाठशाला



घटिका



पाकशाला



अग्निपेटिका




माला




दिनदर्शिका




शाटिका




पादरक्षा





मक्षिका



पिपीलिका


चटका


अजा



मापिका



तुला



नौका


लता



गौशाला



द्राक्षा


वीणा


उत्पीठिका


स्थालिका



जवनिका


कुञ्चिका



सिक्थवर्तिका


द्विचक्रिका


वचन-प्रयोगः




बालिका




बालिके




बालिकाः




अजा




अजे




अजाः




चटका




चटके



चटकाः



पिपीलिका




पिपीलिके



पिपीलिकाः



द्विचक्रिका



द्विचक्रिके



द्विचक्रिकाः

क्रिया-प्रयोगः



बालिका खेलति।



बालिके खेलतः।



बालिकाः खेलन्ति।



अजा पिबति।



अजे पिबतः।



अजाः पिबन्ति।



छात्रा नमति।



छात्रे नमतः।



छात्राः नमन्ति।

महिला पचति।	महिले पचतः।	महिलाः पचन्ति।
चटका कूजति।	चटके कूजतः।	चटकाः कूजन्ति।
गायिका गायति।	गायिके गायतः।	गायिकाः गायन्ति।
वृद्धा वदति।	वृद्धे वदतः।	वृद्धाः वदन्ति।
शिक्षिका लिखति।	शिक्षिके लिखतः।	शिक्षिकाः लिखन्ति।


अभ्यासः

१. चित्रं दृष्ट्वा नाम लिखत -



.....


.....



.....



.....



.....


.....


२. चित्रं दृष्ट्वा उचितं वचनप्रयोगं कुरुत-


छात्रा



.....



.....



.....


द्विचक्रिके


.....


.....


.....


कुञ्चिकाः

३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत -



अजाः ..... ।



महिले ..... ।



शिक्षिका ..... ।

४. उदाहरणानुसारं रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	अजा	अजे	अजाः
	माला	.....	.....
	.....	स्थालिके	.....
	शाटिका	.....	.....
	.....	.....	पिपीलिकाः
	.....	अध्यापिके	.....
	.....	.....	उत्पीठिकाः

५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	खेलति	खेलतः	खेलन्ति
	पिबति	.....	.....
	.....	नमतः	.....
	.....	.....	पचन्ति
	गायति	.....	.....
	.....	कूजतः	.....
	.....	.....	वदन्ति

६. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत -

(क) गायिका ..... । (गायति/गायतः/गायन्ति)

(ख) चटके ..... । (कूजति/कूजतः/कूजन्ति)

(ग) माला: ..... । (अस्ति/स्तः/सन्ति)

(घ) अध्यापिका: ..... । (आगच्छति/आगच्छतः/आगच्छन्ति)

(ङ) पिपीलिके ..... । (चलति/चलतः/चलन्ति)

७. कोष्ठके प्रदत्त-शब्दस्य उचितं वचनप्रयोगं कृत्वा वाक्यानि पूरयत -

यथा - <u>बालिका:</u> नमन्ति। (बालिका)

(क) ..... लिखतः। (अध्यापिका)


(ख) ..... गच्छन्ति। (पिपीलिका)

(ग) ..... गायति। (गायिका)

(घ) ..... वदन्ति। (महिला)

(ङ) ..... पठतः। (छात्रा)

८. चित्रस्य अभिज्ञानं कृत्वा वचनरूपाणि लिखत-

	एकवचनम्	द्विवचनम्	बहुवचनम्
१. 	.....	.....	.....
२. 	.....	.....	.....
३. 	.....	.....	.....
४. 	.....	.....	.....

योग्यता-विस्तारः

१. **ध्यानेन पठत अवगच्छत च -**

र् + अ + म् + आ = रमा

ब् + आ + ल् + इ + क् + आ = बालिका

अ + ध् + य् + आ + प् + इ + क् + आ = अध्यापिका


एते सर्वे स्त्रीलिङ्गशब्दाः। एतेषाम् अन्ते 'आ' (आकारः) अस्ति, अतः एते आकारान्त-स्त्रीलिङ्गशब्दाः सन्ति।


येषां स्त्रीलिङ्गशब्दानाम् अन्ते आकारः भवति, ते आकारान्त- स्त्रीलिङ्गशब्दाः भवन्ति । यथा- रमा, अजा, शाटिका, इत्यादयः।


२. युष्माकं कक्षायां कुटुम्बे वा यासां नामानि आकारान्त- स्त्रीलिङ्गे सन्ति, तासां नामानि लिखत।


३. अस्मिन् पाठे युष्माभिः आकारान्त-स्त्रीलिङ्गशब्दाः पठिताः। युष्माकम् अभ्यासाय अन्ये केचन स्त्रीलिङ्गशब्दाः अत्र सन्ति -


देवी


लेखनी


अङ्कनी


कर्तरी


द्रोणी


घटी



जलकूपी


नदी


नर्तकी

४. एतेषां शब्दानाम् अन्ते ईकारः (ई) अस्ति ।

यथा - द् + ए + व् + ई = देवी

ल् + ए + ख् + अ + न् + ई = लेखनी

न् + अ + द् + ई = नदी

५. एते सर्वे ईकारान्त-स्त्रीलिङ्गशब्दाः सन्ति । एतेषां वचन-प्रयोगः अनेन प्रकारेण भवति -

एकवचनम्	द्विवचनम्	बहुवचनम्
देवी	देव्यौ	देव्यः
लेखनी	लेखन्यौ	लेखन्यः
अङ्कनी	अङ्कन्यौ	अङ्कन्यः
नर्तकी	नर्तक्यौ	नर्तक्यः

६. एतेषां क्रिया-प्रयोगः अनेन प्रकारेण भवति -

एकवचनम्	द्विवचनम्	बहुवचनम्
नर्तकी नृत्यति ।	नर्तक्यौ नृत्यतः ।	नर्तक्यः नृत्यन्ति ।
देवी अस्ति ।	देव्यौ स्तः ।	देव्यः सन्ति ।
भगिनी लिखति ।	भगिन्यौ लिखतः ।	भगिन्यः लिखन्ति ।

वर्ण-विलासः

ध्यानेन पठत-

माला = म् + आ (मा) + ल् + आ (ला)

म् + अ + क् + ष् + इ + क् + आ = मक्षिका

ग् + औ + श् + आ + ल् + आ = गौशाला

ल् + इ + ख् + अ + त् + अ + : = लिखतः

बालिका, द्राक्षा, जवनिका, नमन्ति - एतेषां पदानाम् अपि वर्णविच्छेदं कुरुत।

चतुर्थः पाठः

अकारान्त-नपुंसकलिङ्गशब्दप्रयोगः




मन्दिरम्



गृहम्



द्वारम्



सोपानम्



तिलकम्



उपनेत्रम्



कङ्कतम्



छत्रम्



व्यजनम्



क्रीडनकम्



पुस्तकम्



मुकुटम्




आसनम्



कृष्णफलकम्





कङ्कणम्



करवस्त्रम्



पञ्जरम्



दूरदर्शनम्


सङ्गणकम्



सीवनयन्त्रम्



चक्रम्


शकटम्



रेलयानम्


विमानम्


पर्णम्


फलम्


नारिकेलम्


नीडम्


कमलम्



पुष्पम्


वचन-प्रयोगः


कमलम्


कमले



कमलानि



फलम्



फले



फलानि



पुस्तकम्


पुस्तके


पुस्तकानि


उपनेत्रम्


उपनेत्रे



उपनेत्राणि


छत्रम्



छत्रे


छत्राणि


क्रिया-प्रयोगः



फलं पतति।



फले पततः।



फलानि पतन्ति।



पुष्पं विकसति।



पुष्पे विकसतः।




पुष्पाणि विकसन्ति।



कारयानं चलति।



कारयाने चलतः।



कारयानानि चलन्ति।

व्यजनं भ्रमति।	व्यजने भ्रमतः।	व्यजनानि भ्रमन्ति।
शकटं गच्छति।	शकटे गच्छतः।	शकटानि गच्छन्ति।
पुस्तकम् अस्ति।	पुस्तके स्तः।	पुस्तकानि सन्ति।
मित्रम् आगच्छति।	मित्रे आगच्छतः।	मित्राणि आगच्छन्ति।
पर्णं पतति।	पर्णे पततः।	पर्णानि पतन्ति।

अभ्यासः

१. चित्रं दृष्ट्वा नाम लिखत -



.....



.....



.....



.....



.....




.....


२. चित्रं दृष्ट्वा उचितं वचन-प्रयोगं कुरुत -



चक्रम्



.....




.....



.....




मुकुटे




.....



.....




.....



कङ्कतानि


३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत -



फलानि ..... ।



पुष्पं ..... ।



व्यजने ..... ।

४. उदाहरणानुसारं रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-	पुस्तकम्	पुस्तके	पुस्तकानि
	फलम्	.....	.....
	.....	.....	विमानानि
	.....	आसने	.....
	.....	.....	मन्दिराणि
	.....	सोपाने	.....

५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-	पतति	पतत:	पतन्ति
	विकसति	.....	.....
	.....	भ्रमत:	.....
	.....	.....	हसन्ति
	अस्ति	.....	.....
	.....	नमत:	.....

६. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत -

(क) शकटं ..... । (चलन्ति/चलति/चलतः)

(ख) मित्रे ..... । (आगच्छतः/आगच्छन्ति/आगच्छति)

(ग) पुस्तकानि ..... । (सन्ति/अस्ति/स्तः)

(घ) पर्णं ..... । (पतन्ति/पततः/पतति)

(ङ) व्यजनानि ..... । (भ्रमति/भ्रमन्ति/भ्रमतः)

७. कोष्ठके प्रदत्त-शब्दस्य उचितं वचनप्रयोगं कृत्वा वाक्यानि पूरयत -

यथा - फले पततः। (फलम्)

(क) ..... अस्ति। (उपनेत्रम्)


(ख) ..... भ्रमन्ति। (व्यजनम्)

(ग) ..... विकसतः। (कमलम्)

(घ) ..... चलति। (रेलयानम्)

(ङ) ..... सन्ति। (सोपानम्)


८. चित्रं दृष्ट्वा उचितं पदं लिखत -




.....




.....




.....



.....



.....



.....

योग्यता-विस्तारः

१. **ध्यानेन पठत अवगच्छत च -**

फ् + अ + ल् + अ = फल (फल + म् = फलम्)

प् + उ + ष् + प् + अ = पुष्प (पुष्प + म् = पुष्पम्)

प् + उ + स् + त् + अ + क् + अ= पुस्तक (पुस्तक + म् = पुस्तकम्)

एते सर्वे नपुंसकलिङ्गशब्दाः। एतेषाम् अन्ते 'अ' (अकारः) अस्ति, अतः एते अकारान्त-नपुंसकलिङ्गशब्दाः सन्ति ।

येषां नपुंसकलिङ्गशब्दानाम् अन्ते अकारः भवति, ते अकारान्त-नपुंसकलिङ्गशब्दाः भवन्ति।
यथा - फलम् (फल), पुष्पम् (पुष्प), चित्रम् (चित्र) इत्यादयः।

२. द्वितीय-तृतीय-चतुर्थपाठेषु भवन्तः विविधशब्दानां परिचयं प्राप्तवन्तः ।

- द्वितीयपाठे गणेशः, घटः, विद्यालयः इत्यादयः अकारान्त-पुँल्लिङ्गशब्दाः पठिताः ।
- तृतीयपाठे दुर्गा, स्थालिका, पाकशाला इत्यादयः आकारान्त-स्त्रीलिङ्गशब्दाः पठिताः ।
- तृतीयपाठस्य योग्यताविस्तारे लेखनी, नदी, नर्तकी इत्यादयः ईकारान्त-स्त्रीलिङ्गशब्दाः अपि पठिताः ।
- चतुर्थपाठे फलम्, पुष्पम्, मन्दिरम् इत्यादयः अकारान्तनपुंसकलिङ्गशब्दाः पठिताः ।

३. एतेषां शब्दानां त्रिषु वचनेषु रूपाणि अपि पठितानि।

यथा -

एकवचनम्	द्विवचनम्	बहुवचनम्
बालकः	बालकौ	बालकाः
बालिका	बालिके	बालिकाः
लेखनी	लेखन्यौ	लेखन्यः
फलम्	फले	फलानि

एतानि सर्वाणि प्रथमाविभक्ति-रूपाणि सन्ति ।

४. यः क्रियां करोति, सः **'कर्ता'** भवति। कर्ता यस्मिन् शब्दे भवति, तस्मिन् शब्दे प्रथमा विभक्तिः भवति। प्रथमा-विभक्तेः अनुसारम् एव क्रियायाः प्रयोगः भवति। प्रथमा-विभक्तेः रूपं यस्मिन् वचने भवति, क्रियायाः रूपम् अपि तस्मिन् एव वचने भवति।

यथा -

बालकः	गच्छति ।	बालकौ	गच्छतः ।	बालकाः	गच्छन्ति ।
↓	↓	↓	↓	↓	↓
एकवचनम्	एकवचनम्	द्विवचनम्	द्विवचनम्	बहुवचनम्	बहुवचनम्
छात्रा	लिखति।	छात्रे	लिखतः।	छात्राः	लिखन्ति।
↓	↓	↓	↓	↓	↓
एकवचनम्	एकवचनम्	द्विवचनम्	द्विवचनम्	बहुवचनम्	बहुवचनम्

अवधेयम्

संस्कृते सप्त विभक्तयः सन्ति -

१. प्रथमा विभक्तिः २. द्वितीया विभक्तिः
३. तृतीया विभक्तिः ४. चतुर्थी विभक्तिः
५. पञ्चमी विभक्तिः ६. षष्ठी विभक्तिः
७. सप्तमी विभक्तिः

५. भवतां परिवेशे येषां नामानि अकारान्त-नपुंसकलिङ्गे सन्ति, तेषां नामानि लिखन्तु ।

आगच्छन्तु, वयं खेलामः

द्वितीय-तृतीय-चतुर्थपाठेषु वयं बहून् संस्कृतशब्दान् पठितवन्तः। एतेषां शब्दानाम् आधारेण वयम् एकां क्रीडां कुर्मः-

शब्द-स्मरणक्रीडा

सर्वे छात्राः मण्डलाकारे उपविशन्ति।

अध्यापकः सूचयति - ''प्रत्येकं छात्रः स्वस्थाने उत्थाय निरन्तरं पूर्वपठितान् संज्ञाशब्दान् वदिष्यति। यः छात्रः एकस्मिन् अवसरे सर्वाधिक-शब्दान् वदिष्यति, सः विजयी भविष्यति। शब्दकथनसमये मध्ये विरामः न भवतु। एकस्य शब्दस्य द्विवारम् उच्चारणं न करणीयम्।''

छात्राः एकैकशः शब्दान् वदन्ति। अध्यापकः प्रत्यकेन छात्रेण उच्चारितशब्दान् ध्यानेन शृणोति, तेषां गणनां कृत्वा श्यामपट्टोपरि छात्रस्य नाम्नः सम्मुखे लिखति। अन्ते विजयिनः छात्रस्य नामघोषणां करोति। अत्र ध्यानं दातव्यं यत् शब्दानाम् उच्चारणं शुद्धं स्पष्टं च भवेत्।

वर्ण-विलासः

ध्यानेन पठत-

मन्दिरम् = म् + अ + न् + द् + इ + र् + अ + म्
म न् दि रम्

द् + व् + आ + र् + अ + म् = द्वारम्

ग् + ऋ + ह् + अ + म् = गृहम्

ख् + आ + द् + अ + त् + इ = खादति


– तिलकम्, मुकुटम्, कङ्कणम्, पञ्जरम्, विकसन्ति– एतेषाम् अपि पदानां वर्णविच्छेदं कुरूत।

पञ्चमः पाठः ५

सर्वनाम-शब्दप्रयोगः

(एतत्-तत्-किम्)

एषः/सः



एषः छात्रः।



सः छात्रः।

एषा/सा




एषा महिला।




सा महिला।

एतत्/तत्



एतत् विमानम्।



तत् विमानम्।

एषः / एषा / एतत्

एषः अध्यापकः →
एषः मयूरः। →
एषा चटका। →
एषा द्विचक्रिका। →
एतत् पुष्पम्। →
एतत् मन्दिरम् →

→ पुँल्लिङ्गे
→ स्त्रीलिङ्गे
→ नपुंसकलिङ्गे

सः / सा / तत्

सः अध्यापकः। →
सः मयूरः। →
सा चटका। →
सा द्विचक्रिका। →
तत् पुष्पम् →
तत् मन्दिरम्। →

वचन-प्रयोगः

एषः/एतौ/एते-सः/तौ/ते



एषः बालकः।



सः बालकः।



एतौ बालकौ।



तौ बालकौ।



एते बालकाः।



ते बालकाः।


एकवचनम्	द्विवचनम्	बहुवचनम्
एषः गजः।	एतौ गजौ।	एते गजाः।
एषः मयूरः।	एतौ मयूरौ।	एते मयूराः।
एषः छात्रः।	एतौ छात्रौ।	एते छात्राः।
एषः चमसः।	एतौ चमसौ।	एते चमसाः।

सः कपोतः।	तौ कपोतौ।	ते कपोताः।
सः सैनिकः।	तौ सैनिकौ।	ते सैनिकाः।
सः कुम्भकारः।	तौ कुम्भकारौ ।	ते कुम्भकाराः।
सः घटः।	तौ घटौ।	ते घटाः।


एषा/एते/एताः-सा/ते/ताः




एषा बालिका।




सा बालिका।




एते बालिके।



ते बालिके।



एताः बालिकाः।




ताः बालिकाः।

एकवचनम्	द्विवचनम्	बहुवचनम्
एषा माला।	एते माले।	एताः मालाः।
एषा लता।	एते लते।	एताः लताः।
एषा अध्यापिका।	एते अध्यापिके।	एताः अध्यापिकाः।
एषा पाठशाला।	एते पाठशाले।	एताः पाठशालाः।

सा वीणा।	ते वीणे ।	ताः वीणाः।
सा कुञ्चिका	ते कुञ्चिके।	ताः कुञ्चिकाः।
सा पिपीलिका।	ते पिपीलिके।	ताः पिपीलिकाः।
सा अग्निपेटिका।	ते अग्निपेटिके।	ताः अग्निपेटिकाः।


एतत्/एते/ एतानि-तत्/ ते/ तानि




एतत् फलम्।



तत् फलम्।



एते फले।



ते फले।



एतानि फलानि।



तानि फलानि।

एकवचनम्	द्विवचनम्	बहुवचनम्
एतत् पुस्तकम्।	एते पुस्तके।	एतानि पुस्तकानि।
एतत् व्यजनम्।	एते व्यजने।	एतानि व्यजनानि।
एतत् पर्णम्।	एते पर्णे।	एतानि पर्णानि।
एतत् मन्दिरम्।	एते मन्दिरे।	एतानि मन्दिराणि।
तत् आसनम्।	ते आसने।	तानि आसनानि।
तत् रेलयानम्।	ते रेलयाने।	तानि रेलयानानि।
तत् गृहम्।	ते गृहे।	तानि गृहाणि।
तत् विमानम्।	ते विमाने।	तानि विमानानि।

क्रिया-प्रयोगः



एषः कः ?
एषः छात्रः।
एषः किं करोति?
एषः पठति।



सः कः ?
सः बालकः।
सः किं करोति ?
सः धावति।



एतौ कौ ?
एतौ छात्रौ।
एतौ किं कुरुतः ?
एतौ पठतः।



तौ कौ ?
तौ बालकौ।
तौ किं कुरुतः ?
तौ धावतः।



एते के ?
एते छात्राः।
एते किं कुर्वन्ति ?
एते पठन्ति ।



ते के ?
ते बालकाः।
ते किं कुर्वन्ति ?
ते धावन्ति ।




एषा का ?

एषा छात्रा ।

एषा किं करोति ?

एषा लिखति ।




सा का ?

सा बालिका ।

सा किं करोति ?

सा क्रीडति ।



एते के ?

एते छात्रे ।

एते किं कुरुतः ?

एते लिखतः ।



ते के ?

ते बालिके ।

ते किं कुरुतः ?

ते क्रीडतः ।



एताः काः ?

एताः छात्राः ।

एताः किं कुर्वन्ति ?

एताः लिखन्ति ।



ताः काः ?

ताः बालिकाः ।

ताः किं कुर्वन्ति ?


ताः क्रीडन्ति ।



एतत् किम् ?

एतत् पुष्पम् ।

एतत् विकसति ।



तत् किम् ?

तत् फलम् ।


तत् पतति ।



एते के ?

एते पुष्पे ।

एते विकसतः !



ते के ?

ते फले ।


ते पततः ।



एतानि कानि ?

एतानि पुष्पाणि ।

एतानि विकसन्ति ।




तानि कानि ?

तानि फलानि ।


तानि पतन्ति ।

अभ्यासः


१. चित्रं दृष्ट्वा उचितैः सर्वनाम-संज्ञापदैः रिक्तस्थानानि पूरयत-




एषः .....




....




....



....



....



....

२. मञ्जूषातः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत -

एषः/एषा/एतत्		सः/सा/तत्	
यथा- एषा बालिका ।		सा बालिका ।	
.....	कृषकः।	.....	कृषकः।
.....	पुष्पम्।	.....	पुष्पम्।
.....	अश्वः।	.....	अश्वः।
.....	व्यजनम्।	.....	व्यजनम्।
.....	शाटिका।	.....	शाटिका।
.....	वृक्षः ।	.....	वृक्षः ।
.....	रेलयानम्।	.....	रेलयानम्।
.....	पिपीलिका।	.....	पिपीलिका।
.....	मूषकः ।	.....	मूषकः।

१. चित्रं दृष्ट्वा उचित-लिङ्गवचनादिभिः सर्वनामशब्दैः रिक्तस्थानानि पूरयत -



..... वृक्षः



..... वृक्षः



....



....




....



....

२.




..... माला



..... माला




....



....




....




....


३.




..... व्यजनम्




..... व्यजनम्




....



....



....



....

४. कोष्ठकात् उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत -

(क) ..... सिंहौ। (सः / तौ / ते)

(ख) ..... मालाः। (एषा / एते / एताः)

(ग) ..... विमानम्। (तत् / ते / तानि)

(घ) ..... बालकाः। (एषः / एतौ/एते)

(ङ) ..... लते। (सा / ते / ताः)

(च) ..... फले। (एतत् / एते / एतानि)

(छ) ..... अश्वः। (सः / तौ / ते)

(ज) ..... मक्षिका। (सा / ते / ताः)

(झ) ..... पुस्तकानि। (एतत् / एते / एतानि)

(ञ) ..... बालिकाः। (सा / ते / ताः)

५. उचित-वचनप्रयोगैः रिक्तस्थानानि पूरयत -

एकवचनम्	द्विवचनम्	बहुवचनम्
यथा - एषः लिखति ।	एतौ लिखतः ।	एते लिखन्ति ।
(क) ..... ।	..... ।	एते क्षालयन्ति।
(ख) एषः पठति ।	..... ।	..... ।
(ग) ..... ।	तौ गच्छतः।	..... ।
(घ) ..... ।	..... ।	ते वदन्ति।

६. कोष्ठकात् उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत -

यथा - एषः बालकः । एषः कः ? (कः / कौ /के)

(क) ते सिंहाः । ते ..... ? (कः / कौ /के)

(ख) एषः गणेशः। एषः ..... ? (कः / कौ /के)

(ग) ताः छात्राः। ताः ..... ? (का / के /काः)

(घ) एषा महिला। एषा ..... ? (का / के /काः)

(ङ) एते पुस्तके। एते .... ?(किम् / के /कानि)

(च) तानि फलानि। तानि ..... ?(किम् / के /कानि)

७. अधोलिखितानि एकवचन-वाक्यानि द्विवचने बहुवचने च लिखत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
(क)	एषः लिखति।	.....	.....
(ख)	सः क्षालयति।	.....	.....
(ग)	एषा पठति।	.....	.....
(घ)	सा गच्छति।	.....	.....
(ङ)	तत् पतति।	.....	.....
(च)	एतत् विकसति।	.....	.....

८. अत्र मञ्जूषात्रयं प्रदत्तम् अस्ति। प्रत्येकं मञ्जूषात् एकम् एकं पदं चित्वा वाक्यानि रचयत -

एषः / सा	बालकः / अध्यापिका	लिखति / पाठयति
एतत् / तौ	पुष्पम् / कृषकौ	अस्ति / गच्छतः
एते / ताः / एतानि	गजाः / बालिकाः / पुस्तकानि	चलन्ति / पठन्ति / सन्ति

यथा - एषः बालकः लिखति।

(क) ..... (ख) .....

(ग) ..... (घ) .....

(ङ) ..... (च) .....


योग्यता-विस्तारः

१. द्वितीय-तृतीय-चतुर्थपाठेषु व्यक्ति-वस्तु-स्थानादीनां नामानि ज्ञातवन्तः।

यथा - बालकः, छात्रा, घटः, स्थालिका, पुस्तकम्, विद्यालयः, पाकशाला, उद्यानम् इत्यादीनि ।एते सर्वे संज्ञाशब्दाः ।

संज्ञाशब्दानां स्थाने येषां शब्दानां प्रयोगः भवति, ते सर्वनामशब्दाः भवन्ति, यथा - सः सा, तत् इत्यादयः ।

पश्यत -



२. यथा संज्ञाशब्दानाम् एकवचने, द्विवचने बहुवचने च प्रयोगः भवति, तथा एव सर्वनामशब्दानाम् अपि एकवचने, द्विवचने बहुवचने च प्रयोगः भवति ।प्रमुखाणां सर्वनामशब्दानां प्रथमाविभक्तेः रूपाणि अत्र सन्ति -

		एकवचनम्	द्विवचनम्	बहुवचनम्
तत्	पुँल्लिङ्गम्	सः	तौ	ते
	स्त्रीलिङ्गम्	सा	ते	ताः
	नपुंसकलिङ्गम्	तत्	ते	तानि
एतत्	पुँल्लिङ्गम्	एषः	एतौ	एते
	स्त्रीलिङ्गम्	एषा	एते	एताः
	नपुंसकलिङ्गम्	एतत्	एते	एतानि
किम्	पुँल्लिङ्गम्	कः	कौ	के
	स्त्रीलिङ्गम्	का	के	काः
	नपुंसकलिङ्गम्	किम्	के	कानि

अध्यापकाय निर्देशः -

। अध्यापकः एतेषां सर्वनामशब्दानाम् क्रियापदैः सह अभ्यासं कारयेत् ।

षष्ठः पाठः ६

सर्वनाम-शब्दप्रयोगः


(अस्मद्-युष्मद्)

अहम्/आवाम्/वयम्



अहं छात्रः।

अहं पठामि।



आवां छात्रौ।

आवां पठावः।



वयं छात्राः।

वयं पठामः।



अहं बालिका।

अहं क्रीडामि।



आवां बालिके।

आवां क्रीडावः।




वयं बालिकाः।

वयं क्रीडामः।

१.	अहं भक्तः।	आवां भक्तौ।	वयं भक्ताः।
	अहं नमामि।	आवां नमावः।	वयं नमामः।
२.	अहं महिला।	आवां महिले।	वयं महिलाः।
	अहं पचामि।	आवां पचावः।	वयं पचामः।
३.	अहं लेखकः।	आवां लेखकौ।	वयं लेखकाः।
	अहं लिखामि।	आवां लिखावः।	वयं लिखामः।

त्वम्/युवाम्/यूयम्




त्वं बालकः।	युवां बालकौ।	यूयं बालकाः।
त्वं पठसि।	युवां पठथः।	यूयं पठथ।
त्वं बालिका।	युवां बालिके।	यूयं बालिकाः।
त्वं क्रीडसि।	युवां क्रीडथः।	यूयं क्रीडथ।

१.	त्वं धावक :।	युवां धावकौ।	यूयं धावकाः।
	त्वं धावसि।	युवां धावथः।	यूयं धावथ।
२.	त्वम् अध्यापिका।	युवाम् अध्यापिके ।	यूयम् अध्यापिकाः।
	त्वं लिखसि।	युवां लिखथः।	यूयं लिखथ।
३.	त्वं सैनिक :।	युवां सैनिकौ।	यूयं सैनिकाः।
	त्वं रक्षसि।	युवां रक्षथः।	यूयं रक्षथ।

पश्यत, पठत, अवगच्छत च -

विद्यालये एषः विशिष्टकार्यस्य कालांशः। अधुना छात्राः विविधानि कार्याणि कुर्वन्ति । अध्यापकः छात्रान् कार्यविषये पृच्छति-



अध्यापकः - त्वं किं करोषि ?

छात्रः - अहं पठामि।

अध्यापकः - त्वं किं पठसि ?

छात्रः - अहं पाठं पठामि।

अध्यापकः - उत्तमम्।



अध्यापकः - युवां किं कुरुथः ?

छात्रौ - आवां वृक्षारोपणं कुर्वः।

अध्यापकः - एषः कः वृक्षः ?

छात्रौ - एषः निम्बवृक्षः।

अध्यापकः - अत्युत्तमम् ।

अध्यापकः - यूयं किं कुरुथ ?

छात्राः - वयं गीतं गायामः।

अध्यापकः - यूयं किं गीतं गायथ ?

छात्राः - वयं संस्कृतगीतं गायामः।

अध्यापकः - बहु शोभनम्!

यूयं सम्यक् गीतं गायथ।



अभ्यासः

१. मञ्जूषातः उचितम् 'अस्मद्' शब्दरूपं चित्वा रिक्तस्थानानि पूरयत –

अहम्, आवाम्, वयम्

(क) ..... श्लोकं लिखामि।

(ख) ..... पाठं स्मरामः।

(ग) ..... गीतं गायावः।

(घ) ..... कन्दुकेन क्रीडामि।

(ङ) ..... उद्यानं गच्छावः।

२. मञ्जूषातः युष्मद्-शब्दरूपं चित्वा रिक्तस्थानानि पूरयत –

त्वम्, युवाम्, यूयम्

(क) ..... सैनिकः असि।

(ख) ..... देशं रक्षथ।

(ग) ..... सैनिकाः स्थ।

(घ) ..... पाठं पठथ।

(ङ) ..... गीतं गायथः।

३. परस्परं सुमेलयत–

त्वम्	खादामि
यूयम्	क्रीडावः
आवाम्	गच्छथः
अहम्	लिखसि
युवाम्	रक्षामः
वयम्	पचथ

४. वचनपरिवर्तनं कृत्वा रिक्तस्थानानि पूरयत -

एकवचनम्	द्विवचनम्	बहुवचनम्
यथा - अहम् अध्यापकः।	आवाम् अध्यापकौ।	वयम् अध्यापकाः।
(क) अहं सौचिकः।	.....।	.....।
(ख) त्वं लेखकः।	.....।	.....।
(ग) .....।	युवां भक्तौ।	.....।
(घ) .....।	.....।	यूयं सैनिकाः।
(ङ) .....।	आवां क्रीडकौ।	.....।

५. अधोलिखितानि एकवचन-वाक्यानि द्विवचने बहुवचने च लिखत -

एकवचनम्	द्विवचनम्	बहुवचनम्
[अ] यथा - त्वं लिखसि।	युवां लिखथः।	यूयं लिखथ।
(क) त्वं क्रीडसि	.....।	.....।
(ख) त्वं हससि।	.....।	.....।
(ग) त्वं गच्छसि।	.....।	.....।
(घ) त्वं खादसि	.....।	.....।
[आ] यथा- अहं पठामि।	आवां पठावः।	वयं पठामः।
(क) अहं वदामि।	.....।	.....।
(ख) अहं पचामि।	.....।	.....।
(ग) अहं धावामि।	.....।	.....।
(घ) अहम् आगच्छामि।	.....।	.....।

६. मञ्जूषायां प्रदत्त-पदानि उचित-स्थाने लिखित्वा संवादं पूरयत -

[अ]

त्वं	करोषि	पठामि	पश्यामि	अहं

यथा- भावेशः - त्वं किं करोषि ?

(क) अरुणः - अहं पुस्तकं ..... । त्वं किं..... ?

(ख) भावेशः - ..... दूरदर्शनं पश्यामि ।

(ग) अरुणः - दूरदर्शने..... किं पश्यसि ?

(घ) भावेशः - दूरदर्शने अहं हास्यनाटिकां ..... ।

[आ]

त्वं	गच्छामि	अहं	गच्छसि

(क) मिताली - त्वं कुत्र ..... ?

(ख) आराध्या - अहम् उद्यानं ..... ।

(ग) मिताली - तत्र..... किं करोषि ?

(घ) आराध्या - तत्र ..... भ्रमामि क्रीडामि च।

योग्यता-विस्तारः

१. अस्मिन् पाठे 'अस्मद्' शब्दस्य रूपाणि (अहम्, आवाम्, वयम्) एवञ्च युष्मद्शब्दस्य रूपाणि (त्वम्, युवाम्, यूयम्) पठितानि । एतानि सर्वाणि प्रथमाविभक्तेः रूपाणि सन्ति । अस्मद्- युष्मद् शब्दौ अपि सर्वनामशब्दौ स्तः ।

२. **संस्कृते त्रयः पुरुषाः भवन्ति -**

१. प्रथमः पुरुषः

२. मध्यमः पुरुषः

३. उत्तमः पुरुषः

३. **प्रथमाविभक्तेः रूपाणि एतेषु त्रिषु पुरुषेषु विभक्तानि भवन्ति -**

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	सः	तौ	ते
मध्यमः पुरुषः	त्वम्	युवाम्	यूयम्
उत्तमः पुरुषः	अहम्	आवाम्	वयम्

४. **अवधेयम् -** मध्यमपुरुषस्य त्रीणि रूपाणि (त्वम्, युवाम्, यूयम्) एवञ्च उत्तमपुरुषस्य त्रीणि रूपाणि (अहम्, आवाम्, वयम्) विहाय अन्यानि सर्वाणि रूपाणि 'प्रथमपुरुषे' एव भवन्ति।

एकवचनम्	द्विवचनम्	बहुवचनम्
एषः	एतौ	एते
बालकः	बालकौ	बालकाः
एषा	एते	एताः
बालिका	बालिके	बालिकाः
एतत्	एते	एतानि
पुष्पम्	पुष्पे	पुष्पाणि

इत्यादीनि सर्वाणि रूपाणि प्रथम-पुरुषे एव सन्ति।

५. **क्रिया-रूपाणि अपि त्रिषु पुरुषेषु भवन्ति। यथा - पठ्धातोः रूपाणि पश्यन्तु -**

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पठति	पठतः	पठन्ति
मध्यमः परुषः	पठसि	पठथः	पठथ
उत्तमः पुरुषः	पठामि	पठावः	पठामः

प्रथमाविभक्तेः रूपं यस्मिन् पुरुषे यस्मिन् वचने च भवति, क्रियायाः रूपम् अपि तस्मिन् एव पुरुषे तस्मिन् एव वचने च भवति ।

यथा –

बालकः		पठति		(बालकः पठति।)
प्रथमः पुरुषः	एकवचनम्	प्रथमः पुरुषः	एकवचनम्	
त्वम्		पठसि		(त्वं पठसि।)
मध्यमः पुरुषः	एकवचनम्	मध्यमः पुरुषः	एकवचनम्	
अहम्		पठामि		(अहं पठामि।)
उत्तमः पुरुषः	एकवचनम्	उत्तमः पुरुषः	एकवचनम्	

अन्यानि वाक्यानि –

बालिके नमतः।	बालकाः लिखन्ति।	मनोजः पश्यति।	युवां खादथः।
यूयं क्रीडथ।	अहं पिबामि।	आवां पठावः।	ते गच्छन्ति।

- अनेन एव प्रकारेण इतोऽपि वाक्यानि रचयन्तु।

सप्तमः पाठः ७

भारतभक्ताः



वयं बालकाः भारतभक्ताः
वयं बालिकाः भारतभक्ताः
वयं हि सर्वे भारतभक्ताः
पृथ्वीं स्वर्गं जेतुं शक्ताः ।।
वयम् ..... ।।
वयं सुधीराः वयं सुवीराः
हृष्टमानसाः पुष्टशरीराः
भूरि पठामो भूरि लिखामो
भवितास्मो जनहिते नियुक्ताः ।।
वयम् ..... ।।
जाति-धर्म-मत भेदं त्यक्त्वा
भारतवर्षं पूज्यं मत्वा
भगवद्भावं हृदये धृत्वा
भारतसेवायामनुरक्ताः ।।
वयम् ..... ।।

(डॉ. नरेन्द्रः)

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
भारतभक्ताः	देशभक्तः	भारत के भक्त
पृथ्वीम्	धराम्	पृथ्वी को
स्वर्गम्	देवतालोकम्	स्वर्ग को
जेतुम्	जयनाय	जीतने के लिए
शक्ताः	समर्थाः	समर्थ
सुधीराः	धैर्यशालिनः	धैर्यशाली
सुवीराः	बलशालिनः	वीर
हृष्टमानसाः	प्रसन्नमानसाः	प्रसन्न मन वाले
भूरि	अधिकम्	बहुत
भवितास्मः	भविष्यामः	(हम) होंगे
जनहिते	लोकहिते	लोगों के हित में
नियुक्ताः	नियोजिताः	संलग्न
भेदम्	भेदभावम्	अन्तर को
त्यक्त्वा	विहाय	छोड़कर
भारतवर्षम्	भारतदेशम्	भारत देश को
मत्वा	अभिमत्य	मानकर
भगवद्भावम्	ईशभावम्	ईश्वर के भाव को
हृदये	हृदि	हृदय में
धृत्वा	धारणं कृत्वा	धारण करके
भारतसेवायामनुरक्ताः	देशसेवायामनुरक्ताः	भारत की सेवा में लगे हुए

अभ्यासः

१. उच्चारणं कुरुत -

भारतभक्ताः,	पृथ्वीम्,	स्वर्गम्,	हृष्टमानसाः,
पुष्टशरीराः,	भवितास्मः	नियुक्ताः,	त्यक्त्वा,
भारतवर्षम्,	हृदये,	धृत्वा,	भारतसेवायामनुरक्ताः ।

२. रिक्तस्थानानि पूरयत -

(क) वयं बालकाः ..... ।

(ख) पृथ्वीं ..... जेतुं शक्ताः ।

(ग) भूरि पठामो भूरि ..... ।

(घ) ..... जनहिते नियुक्ताः ।

(ङ) भगवद्भवं ..... धृत्वा, भारतसेवायामनुरक्ताः ।

३. परस्परं सुमेलयत -

(क) वयं सुधीराः	अनुरक्ताः
(ख) हृष्टमानसाः	वयं सुवीराः
(ग) भारतसेवायाम्	भारतभक्ताः
(घ) वयं हि सर्वे	पुष्टशरीराः

४. मञ्जूषायां दत्तानां पदानां साहाय्येन वाक्यनिर्माणं कुरुत -

यथा- वयं सुवीराः ।

..... ।

..... ।

..... ।

..... ।

सुवीराः
कर्तव्यनिष्ठाः
स्वस्थमानसाः
भारतीयाः
राष्ट्रभक्ताः

योग्यता-विस्तारः

अस्मिन् पाठे यूयं 'वयं बालकाः भारतभक्ताः' इत्यस्य गीतस्य पठनं कृतवन्तः । पठनम् एव न, अपितु गायनस्य अभ्यासम् अपि कृतवन्तः स्युः ।गीतगायनम् अतीव आनन्दकरं भवति ।

संस्कृते एतादृशानि आनन्ददायकानि अनेकानि गीतानि सन्ति । तानि अन्यानि गीतानि अपि विविध-पुस्तकेभ्यः, सान्द्रमुद्रिकाभ्यः (C.D.), ध्वनिमुद्रिकाभ्यः (Cassette), अन्तर्जालात् (Internet) च प्राप्तुं शक्यन्ते। युष्माकम् अभ्यासार्थम् एकम् अपरं गीतम् अत्र अस्ति -

भारतं भारतं भवतु भारतम् ।
शक्तिसम्भृतं युक्तिसम्भृतं
शक्ति-युक्तिसम्भृतं भवतु भारतम् ।(भारतं भारतं .....)

शस्त्रधारकं शास्त्रधारकं
शस्त्रशास्त्रधारकं भवतु भारतम् ।(भारतं भारतं .....)

रीतिसंस्कृतं नीतिसंस्कृतं
रीति-नीतिसंस्कृतं भवतु भारतम् ।(भारतं भारतं .....)

कर्मनैष्ठिकं धर्मनैष्ठिकं
कर्मधर्मनैष्ठिकं भवतु भारतम् ।(भारतं भारतं .....)

भक्तिसाधकं मुक्तिसाधकं
भक्ति-मुक्तिसाधकं भवतु भारतम् ।(भारतं भारतं .....)

अध्यापकाय निर्देशः -

। अध्यापकः अस्य गीतस्य अपि छात्रैः सस्वरगायनं कारयेत् ।

अष्टमः पाठः ८

पुनः मूषकः भव



मूषकः धावति।

बिडालः मूषकम् अनुधावति।

भीतः मूषकः ऋषिसमीपं गच्छति।

मूषकः वदति ''मम रक्षणं करोतु''।

ऋषिः वदति ''बिडालः भव''।

मूषकः बिडालः भवति।





बिडालः धावति।

श्वानः बिडालम् अनुधावति।

भीतः बिडालः ऋषिसमीपं गच्छति।

बिडालः वदति ''मम रक्षणं करोतु''।

ऋषिः वदति ''श्वानः भव'' ।

बिडालः श्वानः भवति।





श्वानः धावति।

व्याघ्रः श्वानम् अनुधावति।

भीतः श्वानः ऋषिसमीपं गच्छति।

श्वानः वदति ''मम रक्षणं करोतु''।

ऋषिः वदति ''व्याघ्रः भव'' ।

श्वानः व्याघ्रः भवति।





व्याघ्रः क्षुधितः भवति।

सः ऋषिं वदति–

''अहं त्वां खादामि''।

ऋषिः हसति ''मां खादसि? पुनः मूषकः भव''।

व्याघ्रः मूषकः भवति।

मूषकः पलायनं करोति।



शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
मूषकः	उन्दुरुः	चूहा
धावति	धावनं करोति	दौड़ता है
बिडालः	मार्जारः	बिलाव
अनुधावति	पृष्ठतः धावति	पीछे दौड़ता है।
भीतः	त्रस्तः	डरा हुआ
श्वानः	कुक्कुरः	कुत्ता
व्याघ्रः	हिंसकजन्तुविशेषः	बाघ
क्षुधितः	बुभुक्षितः	भूखा
पलायनं करोति	दूरं गच्छति।	भाग जाता है।

अभ्यासः

१. उच्चारणं कुरुत-

मूषकः	बिडालः	रक्षणम्	श्वानः
व्याघ्रः	क्षुधितः	त्वाम्	माम्

२. एकेन पदेन उत्तरत -

(क) भीतः मूषकः कुत्र गच्छति?

(ख) श्वानः कम् अनुधावति?

(ग) कः श्वानम् अनुधावति?

(घ) 'अहम् त्वां खादामि' इति व्याघ्रः कं वदति?

(ङ) कः पलायनं करोति ?

३. उदाहरणमनुसृत्य कोष्ठकस्य साहाय्येन वाक्यानि रचयत -

उदाहरणम् - व्याघ्रः श्वानं अनुधावति।

बिडालः	मूषकं	अनु	धावति।
कृषकः	वृषभं		गच्छति।
छात्रः	शिक्षकं		लिखति।
कच्छपः	शशकं		चलति।

४. एकवचन-वाक्यानां द्विवचने बहुवचने च परिवर्तनं कुरुत -

एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-(क) बिडालः अनुधावति।	बिडालौ अनुधावतः।	बिडालाः अनुधावन्ति।
(ख) श्वानः धावति।	.....	.....
(ग) मूषकः वदति।	.....	.....
(घ) व्याघ्रः भवति।	.....	.....
(ङ) अहं खादामि।	.....	.....

५. रेखाङ्कितपदम् आधृत्य प्रश्न-निर्माणं कुरुत -

(क) बिडालः मूषकं अनुधावति।

(ख) श्वानः बिडालं अनुधावति।

(ग) मूषकः पलायनं करोति।

(घ) ऋषिः वदति।

योग्यता-विस्तारः

१. ध्यानेन पश्यत -

















चित्राणां साहाय्येन मञ्जूषातः उचितं पदं चित्वा कथां पूरयत -

जलम्,	उद्यानम्,	घटम्,	पिबति,	उपरि,	स्थापयति,	शिलाखण्डान्

एकः काकः भवति। सः पिपासितः भवति। सः जलस्य अन्वेषणं करोति। सः एकम् ..... गच्छति। तत्र एकं ..... पश्यति, किन्तु घटे ..... अल्पं भवति। सः एकम् उपायं करोति। सः .....आनयति, घटे..... । जलम् ..... आगच्छति। काकः जलं ..... । सः प्रसन्नः भवति।

२. अस्मिन् पाठे युष्माभिः चित्राणां माध्यमेन कथा पठिता । कथायाः पठनेन युष्माभिः आनन्दः प्राप्तः स्यात् । वस्तुतः कथानां पठनं सर्वेषां कृते आनन्ददायकं रुचिकरं च भवति एव ।

संस्कृतभाषायाम् अपि बहवः कथाग्रन्थाः सन्ति, येषु अनेकाः आनन्ददायिन्यः शिक्षाप्रदाः रोचकाः च कथाः लिखिताः सन्ति । प्रसिद्धानां कथाग्रन्थानां, तेषां लेखकानां च नामानि अत्र दीयन्ते-

	ग्रन्थः	**लेखकः**
१.	पञ्चतन्त्रम्	विष्णु शर्मा
२.	हितोपदेशः	नारायणपण्डितः
३.	कथासरित्सागरः	सोमदेवः
४.	पुरुषपरीक्षा	विद्यापतिः
५.	जातकमाला	आर्यशूरः

इतोऽपि शुकसप्ततिः, वेतालपञ्चविंशतिका, सिंहासनद्वात्रिंशिका इत्यादयः कथाग्रन्थाः सन्ति। युष्माकम् अध्यापकेन सह एतेषां ग्रन्थानां विषये चर्चां कुरुत ।

नवमः पाठः ९

आदर्शविद्यालयः

(षष्ठी विभक्तिः, दीर्घसन्धिः)



एषः अस्माकं विद्यालयः।
अस्माकं विद्यालयः आदर्शविद्यालयः अस्ति।
विद्यालयस्य भवनं सुन्दरं विस्तृतं च अस्ति।
एतस्य भित्तिषु सूक्तयः लिखिताः सन्ति।



एषः विद्यालयस्य सभागारः।
सभागारस्य अन्तः वयम् ईशवन्दनां कुर्मः।
योगासनम् अपि कुर्मः ।
अत्र एव उत्सवानाम् आयोजनं भवति।




वयं षष्ठीकक्षायाः छात्राः।
एषः अस्माकं कक्षाप्रकोष्ठः। अत्र वयं पठामः।
अस्माकं शिक्षकाः सम्यक् पाठयन्ति।
शिक्षकाः अस्माकं ज्ञानं वर्धयन्ति।
वयं तेषां सम्मानं कुर्मः।



एषः पुस्तकालयः।
अत्र वयं पुस्तकानाम् अध्ययनं कुर्मः।
अत्र बहूनि पुस्तकानि सन्ति।



एषा प्रयोगशाला।
विज्ञानस्य कालांशे वयम् अत्र आगच्छामः।
अत्र प्रयोगाणां माध्यमेन विज्ञानविषयम् अवगच्छामः।



एतत् क्रीडाङ्गणम्।
क्रीडायाः कालांशे वयम् अत्र क्रीडामः।
अत्र अनेकाः क्रीडाः भवन्ति, यथा - पादकन्दुकक्रीडा,
यष्टिक्रीडा, कबड्डीक्रीडा इत्यादयः ।
क्रीडानां द्वारा वयं स्वस्थाः भवामः।


एषः सङ्गणक-प्रकोष्ठः।
अत्र वयं सङ्गणकयन्त्राणि चालयामः,
टङ्कणस्य अभ्यासम् अपि कुर्मः।





एतत् विद्यालयस्य उद्यानम्।
•अत्र वृक्षाः पादपाः च सन्ति, यथा-निम्बः, बिल्वः,
अश्वत्थः, तुलसी इत्यादयः। अत्र बहूनि पुष्पाणि
विकसन्ति, यथा-पाटलम्, मालती इत्यादीनि।
यदा वर्षाकालः भवति, तदा अत्र वृक्षाणां रोपणं भवति।

ते शौचालयाः।
बालकानां बालिकानां च शौचालयाः पृथक् सन्ति।



विद्यालयस्य मध्ये जलमन्दिरम् अस्ति। तत्र वयं जलं पिबामः। विद्यालयस्य स्वच्छता प्रतिदिनं भवति ।अतः अस्माकं विद्यालयः स्वच्छः सुन्दरः च अस्ति । एषः अस्माकं प्रियः विद्यालयः अस्ति ।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
एषः	अयम्	यह
अस्माकम्	अस्मदीयः	हमारा
सभागारः	समारोहभवनम्	विशाल कक्ष (कमरा)
अन्तः	अन्तर्भागम्	अन्दर
प्रकोष्ठः	कक्षः	कक्ष
सम्यक्	उत्तमम्	अच्छी तरह से
बहूनि	अनेकानि	बहुत सारी
अवगच्छामः	जानीमः	जानकारी प्राप्त करते हैं।
क्रीडाङ्गणम्	खेलप्राङ्गणम्	खेल का मैदान
पादकन्दुकक्रीडा	क्रीडाविशेषः	फुटबाल
यष्टिक्रीडा	क्रीडाविशेषः	हॉकी
सङ्गणकम्	कम्प्यूटरयन्त्रम्	कम्प्यूटर
निम्बः	निम्बवृक्षः	नीम
बिल्वः	बिल्ववृक्षः	बेल (बिल्व) का पेड़
अश्वत्थः	पिप्पलवृक्षः	पीपल वृक्ष
पाटलम्	पाटलपुष्पम्	गुलाब
मालती	मालतीपुष्पम्	चमेली
भित्तिषु	भित्तिकासु	दीवारों पर
वर्धयन्ति	वर्धनं कुर्वन्ति	बढ़ाते हैं।

अभ्यासः

१. उच्चारणं कुरुत-

अस्माकम्	आदर्शविद्यालयः	विस्तृतम्	कुर्मः
षष्ठीकक्षायाः	प्रकोष्ठः	अध्ययनम्	अवगच्छामः
क्रीडाङ्गणम्	यष्टिक्रीडा	टङ्कणस्य	अभ्यासम्

२. एकपदेन उत्तरत -

(क) सभागारस्य अन्तः केषाम् आयोजनं भवति ?

(ख) पुस्तकालये वयं केषाम् अध्ययनं कुर्मः ?

(ग) सङ्गणकप्रकोष्ठे वयं कस्य अभ्यासं कुर्मः ?

(घ) विद्यालयस्य मध्ये किम् अस्ति ?

(ङ) के अस्माकं ज्ञानं वर्धयन्ति ?

३. एकवाक्येन उत्तरत-

(क) विद्यालयस्य भवनं कीदृशम् अस्ति ?

(ख) सभागारे केषाम् आयोजनं भवति ?

(ग) केषां माध्यमेन विज्ञानविषयम् अवगच्छामः ?

(घ) वृक्षाणां रोपणं कदा भवति ?

(ङ) विद्यालयस्य मध्ये किम् अस्ति ?

४. अधोलिखितानां पदानां सन्धिं कुरुत-

यथा - **विद्या + आलयः** = विद्यालयः

(क) पुस्तक +आलयः = ...

(ख) सभा + आगारः = ...

(ग) क्रीडा + अङ्गणम् = ...

(घ) परि + ईक्षा = ...

(ङ) सु + उक्तयः = ...

५. अधोलिखितानां पदानां वचनपरिवर्तनं कुरुत –

	एकवचनम्		द्विवचनम्	बहुवचनम्
यथा –	विद्यालयस्य	=	विद्यालययोः	विद्यालयानाम्
(क)	उत्सवस्य	=	.....	.....
(ख)	शिक्षकस्य	=	.....	.....
(ग)	पादपस्य	=	.....	.....
(घ)	मम	=	.....	.....
(ङ)	वृक्षस्य	=	.....	.....

६. परस्परं सुमेलयत –

	स्थानम्	कार्यम्
यथा –	क्रीडाङ्गणम्	ईशवन्दना
(क)	पुस्तकालयः	टङ्कणस्य अभ्यासः
(ख)	जलमन्दिरम्	विज्ञानस्य प्रयोगाः
(ग)	सभागारः	क्रीडा
(घ)	प्रयोगशाला	पुस्तकानाम् अध्ययनम्
(ङ)	सङ्गणकप्रकोष्ठः	जलस्य पानम्

७. अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यानि रचयत –

यथा – आदर्शः – एषः आदर्शः विद्यालयः अस्ति ।

(क) सङ्गणकम् – ..... ।

(ख) वयम् – ..... ।

(ग) पादपाः – ..... ।

(घ) सम्यक् – ..... ।

(ङ) योगासनस्य – ..... ।

८. रेखाङ्कितपदस्य स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत -

(क) अनिलः विद्यालयं गच्छति ।

(ख) छात्रा पुस्तकं पठति।

(ग) विद्यालयस्य सभागारः अस्ति ।

(घ) छात्राः शिक्षकाणां सम्मानं कुर्वन्ति ।

(ङ) अध्यापिकायाः पुस्तकम् अस्ति।

९. प्रदत्तशब्दानां षष्ठीविभक्तेः रूपाणि लिखत -

शब्दः	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा - बालक -	बालकस्य	बालकयोः	बालकानाम्
पर्वत -	पर्वतस्य	.....	.....
अध्यापक -	.....	.....	अध्यापकानाम्
विद्यालय -	.....	विद्यालययोः	.....
बालिका -	बालिकायाः	बालिकयोः	बालिकानाम्
लता -	लतायाः	.....	.....
अजा -	.....	अजयोः	.....
क्रीडा -	.....	.....	क्रीडानाम्
फल -	फलस्य	फलयोः	फलानाम्
व्यजन -	व्यजनस्य	.....	.....
उद्यानम् -	.....	उद्यानयोः	.....
पुस्तक -	.....	.....	पुस्तकानाम्

योग्यता-विस्तारः

१. ध्यानेन पश्यत, पठत अवगच्छत च-



शिवः



गणेशः

शिवस्य पुत्रः गणेशः ।

शिवः - शिवस्य



सीता



रामः

सीतायाः पतिः रामः ।

सीता - सीतायाः



रामायणम्



वाल्मीकिः

एषः षष्ठीविभक्तेः प्रयोगः। सम्बन्धस्य प्रकटनाय षष्ठीविभक्तेः प्रयोगः भवति। उपरितन-वाक्येषु षष्ठीविभक्तेः एकवचन-रूपाणां प्रयोगः अस्ति। अनेन एव प्रकारेण द्विवचने बहुवचने च अपि प्रयोगः भवति।

रामायणस्य लेखकः वाल्मीकिः।

रामायणम् – रामायणस्य

२. सर्वनामशब्दानां षष्ठी विभक्तेः प्रयोगान् पठत अवगच्छत च –

तत्	पुँल्लिङ्गम्	तस्य	तयोः	तेषाम्
	स्त्रीलिङ्गम्	तस्याः	तयोः	तासाम्
	नपुंसकलिङ्गम्	तस्य	तयोः	तेषाम्
एतत्	पुँल्लिङ्गम्	एतस्य	एतयोः	एतेषाम्
	स्त्रीलिङ्गम्	एतस्याः	एतयोः	एतासाम्
	नपुंसकलिङ्गम्	एतस्य	एतयोः	एतेषाम्
किम्	पुँल्लिङ्गम्	कस्य	कयोः	केषाम्
	स्त्रीलिङ्गम्	कस्याः	कयोः	कासाम्
	नपुंसकलिङ्गम्	कस्य	कयोः	केषाम्
अस्मद्		मम	आवयोः	अस्माकम्
युष्मद्		तव	युवयोः	युष्माकम्

३. अस्मिन् पाठे युष्माभिः केचन विशेषशब्दाः पठिताः।

यथा– विद्यालयः, सभागारः, योगासनम्, सूक्तयः, पुस्तकालयः इत्यादयः।

एतेषु शब्देषु शब्दद्वयस्य मेलनं कृतम् अस्ति।

यथा– विद्यालयः = विद्या + आलयः

सभागारः = सभा + आगारः

अत्र प्रथमशब्दस्य अन्तिमवर्णेन सह द्वितीयशब्दस्य प्रथमवर्णस्य मेलनं कृतम् अस्ति, पश्यत-

विद्या +आलयः

विद्‌य् आ + आलयः

विद्‌य् आ लयः = विद्यालयः (विद्यालयः)

सन्धेः त्रयः भेदाः सन्ति-
1. स्वर-सन्धिः
2. व्यञ्जन-सन्धिः
3. विसर्ग-सन्धि

वर्णानां मेलनस्य एषा प्रक्रिया सन्धिः कथ्यते।

यत्र समानानां ह्रस्वदीर्घस्वराणां मेलनेन दीर्घस्वरः भवति, तत्र दीर्घसन्धिः भवति।

यत्र स्वरवर्णयोः मेलनं भवति, तत्र स्वरसन्धिः भवति।
स्वरसन्धेः पञ्चभेदाः भवन्ति। तेषु एकः भेदः दीर्घसन्धिः अस्ति।

-दीर्घसन्धेः सामान्यनियमः अनेन प्रकारेण अस्ति -

अ/आ + अ/आ = आ		
पुस्तक + आलयः	=	पुस्तकालयः
देव + आलयः	=	देवालयः
मुर + अरिः	=	मुरारिः
योग + आसनम्	=	योगासनम्

इ/ई + इ/ई = ई		
परि + ईक्षा	=	परीक्षा
हरि + ईशः	=	हरीशः
अति + इव	=	अतीव
रजनी + ईशः	=	रजनीशः

उ/ऊ + उ/ऊ = ऊ		
सु + उक्तयः	=	सूक्तयः
भानु + उदयः	=	भानूदयः
वधू + उत्सवः	=	वधूत्सवः
गुरु + उपदेशः	=	गुरूपदेशः

ऋ/ॠ + ऋ/ॠ = ॠ		
पितृ + ऋणम्	=	पितॄणम्
होतृ + ऋकारः	=	होतॄकारः







अध्यापकाय निर्देशः -

- एतादृशानि अन्यानि अपि उदाहरणानि स्वपाठ्यपुस्तके पश्यत।
- अध्यापकः छात्रैः दीर्घसन्धेः अन्यान्यशब्दानाम् अत्र विशेषरूपेण सन्धिप्रकियां विच्छेदप्रक्रियां च बोधयेत्।

दशमः पाठः १०


संख्याज्ञानम्

(संख्यावाची/क्रमवाची)

	पुँल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
१ 1	 एकः बालकः।	 एका बालिका।	 एकं पुष्पम्।
२ 2	 द्वौ मयूरौ।	 द्वे माले।	 द्वे विमाने।
३ 3	 त्रयः सिंहाः।	 तिस्रः नौकाः।	 त्रीणि चक्राणि।
४ 4	 चत्वारः गजाः।	 चतस्रः अजाः।	 चत्वारि कमलानि।
५ 5	 पञ्च वृक्षाः।	 पञ्च द्विचक्रिकाः।	 पञ्च गृहाणि।




६
6
षट् शुकाः।



७
7
सप्त वीणाः।




८
8
अष्ट फलानि।




९
9
नव अश्वाः।




१०
10
दश चटकाः।



११
11
एकादश कपोताः।



१२
12
द्वादश पर्णानि।




१३
13
त्रयोदश उष्ट्राः।




१४
14

चतुर्दश दीपकाः।




१५
15

पञ्चदश पुस्तकानि।




१६
16

षोडश सिक्थवर्तिकाः।




१७
17

सप्तदश चमसाः।




१८
18

अष्टादश घटिकाः।



१९
19


नवदश पिपीलिकाः।



२०
20

विंशतिः कुञ्चिकाः।

पश्यत, पठत अवगच्छत च-



एतत् उद्यानम्। अत्र एकः वटवृक्षः अस्ति। वटवृक्षस्य उपरि द्वौ वानरौ उपविशतः। तत्र एव द्वे चटके स्तः, ते मधुरं कूजतः। त्रयः शुकाः अपि तत्र सन्ति। वृक्षस्य अधः चत्वारः मयूराः नृत्यन्ति। समीपे एव चतस्रः बालिकाः क्रीडन्ति। पञ्च महिलाः वार्तालापं कुर्वन्ति। षट् पुरुषाः भ्रमणं कुर्वन्ति। कोणे एकः चत्वरः अस्ति। तत्र सप्त कपोताः अन्नकणान् खादन्ति। सम्मुखं पुष्पपादपानां पङ्क्तिः अस्ति। तत्र अष्ट पुष्पाणि विकसन्ति। उद्यानस्य त्रीणि द्वाराणि सन्ति। बहिर्भागे नव द्विचक्रिकाः सन्ति। उद्यानस्य समीपे एकः सरोवरः अस्ति। तत्र दश कमलानि विकसन्ति। उद्यानस्य दृश्यं मनोहरम् अस्ति।

आगच्छन्तु वयं रेलयानं पश्यामः -



रेलयाने	प्रथमः	बालकः पवनः।
रेलयाने	द्वितीयः	बालकः मनीषः।
रेलयाने	तृतीयः	बालकः शङ्करः।
रेलयाने	चतुर्थः	बालकः अनूपः।
रेलयाने	पञ्चमः	बालकः रहीमः।
रेलयाने	षष्ठः	बालकः अमितः।
रेलयाने	सप्तमः	बालकः लोकेशः।
रेलयाने	अष्टमः	बालकः तरुणः।
रेलयाने	नवमः	बालकः अनिलः।
रेलयाने	दशमः	बालकः मुरलीधरः।


अभ्यासः

१. उच्चारणं कुरुत -

द्वे,	द्वौ,	तिस्रः,	त्रीणि,
चत्वारि,	षट्,	चतस्रः,	त्रयोदश,
षोडश,	विंशतिः,	पङ्क्तिः,	बहिर्भागे ।


२. मञ्जूषायां विद्यमानानां चित्राणां गणनां कृत्वा उचितसङ्ख्यापदं रिक्तस्थाने लिखत -

यथा -  त्रयः शुकाः।

(क)  ..... कुञ्चिकाः।

(ख)  ..... चमसौ।

(ग)  ..... सिक्थवर्तिका

(घ)  ..... पर्णानि

(ङ)  ..... पुष्पाणि

३. परस्परं सुमेलयत -

द्वे	९
चत्वारि	२०
नव	२
एकादश	१७
त्रयोदश	४
पञ्चदश	१५
सप्तदश	१३
विंशति:	११

४. कोष्ठकात् उचितं सङ्ख्यापदं चित्वा लिखत -

(क) ..... व्यजने । (द्वौ / द्वे)

(ख) ..... पुस्तकानि । (त्रय: / तिस्र: / त्रीणि)

(ग) ..... अध्यापिका । (एक: / एका / एकम्)

(घ) ..... उत्पीठिका: । (चत्वार: / चत्वारि / चतस्र:)

५. अधोलिखितसंख्याः संस्कृतशब्देषु लिखत –

(क) ५ –		(ख) १८ –	
(ग) ७ –		(घ) १२ –	
(ङ) १० –		(च) ६ –	
(छ) १६ –		(ज) १९ –	

६. चित्रं दृष्ट्वा उचितं संख्यापदं लिखित्वा रिक्तस्थानानि पूरयत –



(क) अत्र ..... नौके स्तः ।

(ख) अत्र ..... बालकाः स्नानं कुर्वन्ति।

(ग) अत्र ..... मीनाः सन्ति।

(घ) अत्र ..... कमलानि विकसन्ति।

(ङ) अत्र ..... बकाः सन्ति।

७. उचितं क्रमवाचकपदानि लिखित्वा रिक्तस्थानानि पूरयत –

यथा – १. प्रथमः मासः चैत्रः। २. ..... मासः वैशाखः।

३. ..... मासः ज्येष्ठः। ४. ..... मासः आषाढः।

५. ..... मासः श्रावणः। ६. ..... मासः भाद्रपदः।

७. ..... मासः आश्विनः। ८. ..... मासः कार्तिकः।

९. ..... मासः मार्गशीर्षः। १०. .....मासः पौषः।

११. एकादशः मासः माघः। १२. द्वादशः मासः फाल्गुनः।

योग्यता-विस्तारः

⇨ एकम्, द्वे, त्रीणि.....इत्यादयः संख्यावाचक शब्दाः भवन्ति। गणनाकरणाय एतेषां शब्दानां प्रयोगः भवति।

⇨ प्रथमः, द्वितीयः, तृतीयः ..... इत्यादयः क्रमवाचकशब्दाः भवन्ति। क्रमस्य प्रदर्शनाय एतेषां शब्दानां प्रयोगः भवति।

⇨ **सप्ताहे - सप्त वासराः भवन्ति -**

प्रथमः	वासरः	-	रविवासरः।
द्वितीयः	वासरः	-	सोमवासरः।
तृतीयः	वासरः	-	मङ्गलवासरः।
चतुर्थः	वासरः	-	बुधवासरः।
पञ्चमः	वासरः	-	गुरुवासरः।
षष्ठः	वासरः	-	शुक्रवासरः।
सप्तमः	वासरः	-	शनिवासरः।

संख्यागीतम्

एकम् एकम् एकम्, मम हृदयम् एकम्।
द्वे द्वे द्वे, मम नेत्रे द्वे।।

त्रीणि त्रीणि त्रीणि, बिल्वपत्राणि त्रीणि।
चत्वारि चत्वारि चत्वारि, ब्रह्ममुखानि चत्वारि।।

पञ्च पञ्च पञ्च, पाण्डवाः सन्ति पञ्च।
षट् षट् षट्, कार्तिकेयस्य मस्तकानि षट्।।

सप्त सप्त सप्त, वासराः सन्ति सप्त।
अष्ट अष्ट अष्ट, देव्याः भुजाः अष्ट।।

नव नव नव, ग्रहाः सन्ति नव।
दश दश दश, रावणस्य मस्तकानि दश।।


अध्यापकाय निर्देशः -

। अध्यापकः संख्यागीतस्य अभ्यासः सङ्केतैः अभिनयेन च सह छात्रान् कारयेत्।

एकादशः पाठः ११

किं श्रेष्ठम्?

शरीराङ्गानां परिचयः



एकदा शरीरस्य अङ्गानां मध्ये कलहः भवति। प्रत्येकम् अङ्गं कथयति - अहं श्रेष्ठम्, अहं श्रेष्ठम्। तदा किं किं भवति? आगच्छन्तु, वयं पश्यामः -



मुखम्

अहं मुखम् । जनाः मम द्वारा वदन्ति, खादन्ति, पिबन्ति च। अतः अहं श्रेष्ठम्।



दन्ताः

नहि नहि। वयं भोजनस्य चर्वणं कुर्मः। वयं मुखस्य शोभां वर्धयामः। अतः वयं श्रेष्ठाः।



जिह्वा

तथा नास्ति। मां विना भाषणं न भवति। अहं भोजनस्य रसास्वादनं करोमि। भोजनं मधुरम् अस्ति अथवा कटु अस्ति, इति अहम् एव वदामि। अतः अहं श्रेष्ठा।



हस्तः

भोः। भोजनस्य चर्वणं दन्ताः कुर्वन्ति, रसास्वादनं जिह्वा करोति, किन्तु भोजनं मुखे अहं स्थापयामि। शरीरस्य बहूनि कार्याणि अहं करोमि, अतः अहं श्रेष्ठः।



उदरम्

एवं नास्ति। हस्तः भोजनं मुखे स्थापयति, दन्ताः चर्वणं कुर्वन्ति, जिह्वा रसास्वादनं करोति; किन्तु भोजनस्य पाचनकार्यम् अहम् एव करोमि। तदा शरीरं पुष्टं भवति। अतः अहं श्रेष्ठम्।



नेत्रम्

तथा नास्ति। यदि अहम् आहारं न पश्यामि, तर्हि आहारस्य ज्ञानम् एव न भवति। अहं सर्वान् पदार्थान् पश्यामि, तेषां ज्ञानं करोमि। नेत्रं विना सुन्दरस्य दृश्यस्य दर्शनं न भवति। अतः अहं श्रेष्ठम्।



पादः

नैव नैव। अहं श्रेष्ठः अस्मि। अहं सम्पूर्णशरीरस्य भारं वहामि। पादयोः द्वारा जनाः गमनागमनं कुर्वन्ति ।

एतेषां वार्तालापं मस्तिष्कः शृणोति। सः चिन्तयति – ''एतेषाम् अङ्गानां कलहः सम्यक् नास्ति। एतेषां कलहः शरीरस्य हानिं करोति।'' तदा मस्तिष्कः सर्वाणि अङ्गानि कथयति –

''भोः ! शरीरस्य सर्वेषाम् अङ्गानां समानं महत्वम् अस्ति। यदि एकम् अपि अङ्गं कार्यं न करोति, तर्हि शरीरस्य कार्यं बाधितं भवति। अतः सर्वाणि श्रेष्ठानि सन्ति। परस्परं कलहः मास्तु।''

सर्वाणि अङ्गानि मस्तिष्कस्य कथनं श्रुत्वा कार्यरतानि भवन्ति।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
एकदा	एकस्मिन् समये	एक बार
कलहः	विवादः	झगड़ा
कथयति	वदति	कहता है
तदा	तस्मिन् समये	तब
मम	मे	मेरा
चर्वणम्	पेषणम्	चबाना
वर्धयामः	वर्धनं कुर्मः	बढ़ाते हैं

रसास्वादनं	रसस्य आस्वादनम्	रस का आस्वादन
मधुरं	मिष्टम्	मीठा
कटु	रुचिविशेष:	कड़वा
दन्ता:	दशना:	दाँत
जिह्वा	रसना	जीभ
स्थापयामि	स्थापनं करोमि	रखता हूँ
बहूनि	अनेकानि	अनेक
पाचनकार्यम्	पाचनस्य कार्यम्	पचाने का काम
पुष्टं	पुष्टियुक्तम्	मजबूत, मांसल
आहारम्	भोजनम्	भोजन
सर्वान्	सकलान्	सभी को
नैव	न	नहीं
गमनागमनम्	गमनम् आगमनं च	आना-जाना
वहामि	वहनं करोमि	वहन करता हूँ
वार्तालापम्	सम्भाषणम्	बातचीत को
समानम्	तुल्यम्	समान
बाधितम्	अवरुद्धम्	अवरुद्ध
मास्तु	न भवतु	न हो
श्रुत्वा	श्रवणं कृत्वा	सुनकर
कार्यरतानि	कार्ये संलग्नानि	कार्य में संलग्न

अभ्यास:

१. उच्चारणं कुरुत -

शरीरस्य	कलह:	आगच्छन्तु	चर्वणम्
वर्धयाम:	रसास्वादनम्	जिह्वा	पाचनकार्यम्
दृश्यस्य	गमनागमनम्	मास्तु	शृण्वन्ति

२. एकपदेन उत्तरत –

(क) कलहः केषां मध्ये भवति ?

(ख) दन्ताः कस्य चर्वणं कुर्वन्ति ?

(ग) मुखे भोजनं कः स्थापयति ?

(घ) पादयोः द्वारा जनाः किं कुर्वन्ति ?

(ङ) 'परस्परं कलहः मास्तु' इति कः कथयति ?

३. शरीरस्य अङ्गानि तेषां कार्यैः सह सुमेलयत –

	शरीरस्य अङ्गानि	कार्याणि
(क)	मुखम्	दर्शनं करोति ।
(ख)	जिह्वा	वदति, खादति पिबति च।
(ग)	नेत्रम्	भोजनस्य रसास्वादनं करोति।
(घ)	पादः	चर्वणं कुर्वन्ति।
(ङ)	दन्ताः	भारं वहति।

४. अधोलिखितान् वर्णान् उचितक्रमेण योजयित्वा अङ्गानां नामानि लिखत –

यथा – [वा] [जि] [ह्] – जिह्वा

(क) [उ] [म्] [द] [र] – .....

(ख) [म्] [ने] [त्र] – .....

(ग) [टः] [ला] [ल] – .....

(घ) [का] [सि] [ना] – .....

(ङ) [पो] [लः] [क] – .....

५. अधोलिखितानां पदानां सन्धिं/सन्धिविच्छेदं कुरुत –

(क) वार्ता + आलापः – .....

(ख) रस + आस्वादनम् – .....

(ग) ..... + ... – नास्ति

(घ) ..... + ... – देवालयः

(ङ) गमन + आगमनम् – .....

६. कोष्ठके प्रदत्तशब्दस्य समुचितं द्वितीयाविभक्तिरूपं प्रयुज्य वाक्यानि पूरयत -

यथा - शिक्षकः बालकानां वार्तालापं (वार्तालापः) शृणोति।

(क) वयं विद्यालयस्य ..... (शोभा) वर्धयामः।

(ख) श्रमिकः ..... (भारः) वहति।

(ग) बुभुक्षितः जनः ..... (आहारः) अन्विष्यति।

(घ) यूयं ..... (खाद्यपदार्थाः) खादथ।

(ङ) माता गृहस्य सर्वाणि ..... (कार्याणि) करोति।

७. निर्दिष्टस्य अङ्गस्य चित्रनिर्माणं कुरुत -

नेत्रम्	कर्णः
नासिका	दन्ताः
पादः	हस्तः

८. प्रदत्तशब्दानां द्वितीयाविभक्तेः रूपाणि लिखत –

	शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
पुँल्लिङ्गे	बालक	–	बालकम्	बालकौ	बालकान्
	ग्रन्थ	–	ग्रन्थम्	.....	.....
	अध्यापक	–	.....	अध्यापकौ	.....
	विद्यालय	–	.....	.....	विद्यालयान्
स्त्रीलिङ्गे	बालिका	–	बालिकाम्	बालिके	बालिकाः
	लता	–	लताम्	.....	.....
	छात्रा	–	.....	छात्रे	.....
	क्रीडा	–	.....	.....	क्रीडाः
नपुंसकलिङ्गे	फल	–	फलम्	फले	फलानि
	पुस्तक	–	पुस्तकम्	.....	.....
	अङ्ग	–	.....	अङ्गे	.....
	कार्य	–	.....	.....	कार्याणि

९. द्वितीयाविभक्ति-रूपाणि प्रयुज्य उदाहरणानुसारं वाक्यानि रचयत –

बालकः

पाठ
पत्र
श्लोक
नाटिका
रोटिका
वस्त्र

पठति
लिखति
वदति
पश्यति
खादति
क्षालयति

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा –	बालकः पाठं पठति।	बालकः पाठौ पठति।	बालकः पाठान् पठति।
	..... ।	बालकः पत्रे लिखति।	..... ।
	..... ।	..... ।	बालकः श्लोकान् वदति।
	बालकः नाटिकां पश्यति।	बालकः रोटिके खादति।	..... ।
	..... ।	..... ।	..... ।
	..... ।		बालकः वस्त्राणि क्षालयति।

योग्यता-विस्तारः

(१.) अस्मिन् पाठे युष्माभिः शरीरस्य अङ्गानां नामानि पठितानि। अत्र दन्ताः भोजनरूपेण विविधानां **खाद्यपदार्थानां** चर्वणं कुर्वन्ति। आगच्छन्तु, वयं कतिपयानां खाद्यपदार्थानां नामानि जानीमः -

संस्कृतशब्दः	हिन्दी अर्थ	संस्कृतशब्दः	हिन्दी अर्थ	संस्कृतशब्दः	हिन्दी अर्थ
रोटिका	रोटी	कृशरः	खिचड़ी	लप्सिका	लपसी
शाकम्	सब्जी	मिष्टान्नम्	मिठाई	पूरिका	पूड़ी
सूपः	दाल	रसगोलकम्	रसगुल्ला	माषगर्भिका	कचौरी
तेमनम्	कढी	कृष्णगोलकम्	गुलाब जामुन	यवागू	दलिया
पायसम्	खीर	राधेयम्	रायता	संयावः	हलवा
ओदनम्	चावल	मोदकम्	लड्डू	अपूपः	पुआ

फलानां नामानि

संस्कृतशब्दः	हिन्दी अर्थ	संस्कृतशब्दः	हिन्दी अर्थ
द्राक्षाफलम्	अंगूर	जम्बूफलम्	जामुन
दाडिमम्	अनार	आम्रम्	आम
नारङ्गम्	नारंगी	कलिङ्गम्	तरबूज
नारिकेलम्	नारियल	सेवम्	सेव
कदलीफलम्	केला	मधुकर्कटी	पपीता

(२.) **पश्यत, पठत अवगच्छत च -**



बालकः श्लोकं पठति।
श्लोकः - श्लोकम्



महिला रोटिकां पचति।
रोटिका - रोटिकाम्



बिडालः दुग्धं पिबति।
दुग्धम् - दुग्धम्

(३.) सर्वनामशब्दानां द्वितीयाविभक्ति-रूपाणि-

	लिङ्गम्	एकवचनम्	द्विवचनम्	बहुवचनम्
तत्	पुँल्लिङ्गम्	तम्	तौ	तान्
	स्त्रीलिङ्गम्	ताम्	ते	ताः
	नपुंसकलिङ्गम्	तत्	ते	तानि
एतत्	पुँल्लिङ्गम्	एतम्	एतौ	एतान्
	स्त्रीलिङ्गम्	एताम्	एते	एताः
	नपुंसकलिङ्गम्	एतत्	एते	एतानि
किम्	पुँल्लिङ्गम्	कम्	कौ	कान्
	स्त्रीलिङ्गम्	काम्	के	काः
	नपुंसकलिङ्गम्	किम्	के	कानि
अस्मद्	-----	माम्	आवाम्	अस्मान्
युष्मद्	-----	त्वाम्	युवाम्	युष्मान्

(४.) आगच्छन्तु, वयं खेलामः

अङ्गस्पर्श-क्रीडा



प्रथमं चरणम् –सर्वे छात्राः मण्डलाकारे उपविशन्ति।
अध्यापकः अपि मण्डले एकत्र तिष्ठति।
अध्यापकः क्रमशः शरीरस्य अङ्गानां नामानि वदति, यथा- नेत्रम्, कर्णः, हस्तः इत्यादीनि। अङ्गस्य नामकथनेन सह अध्यापकः तस्य अङ्गस्य स्पर्शम् अपि करोति। अध्यापकः यस्य अङ्गस्य नाम वदति, छात्राः तस्य एव अङ्गस्य स्पर्शं कुर्वन्ति। छात्राः अङ्गस्पर्शेन सह अङ्गस्य नाम अपि उच्चारयन्ति। यः छात्रः अध्यापकेन निर्दिष्टस्य अङ्गस्य स्पर्शं न करोति, सः बाह्यः भवति।

द्वितीयं चरणम् – प्रारम्भे अध्यापकः छात्रान् सूचयति "अहं यस्य अङ्गस्य नाम वदामि, यूयं तस्य एव अङ्गस्य स्पर्शं कुरुत।" अस्मिन् चरणे अध्यापकः छात्रेषु भ्रमम् उत्पादयति। तदर्थम् अध्यापकः छात्रेषु यस्य अङ्गस्य नाम वदति, तस्य अङ्गस्य स्पर्शम् अकृत्वा अन्यत् अङ्गं स्पृशति। अस्मिन् समये छात्राः तस्य एव अङ्गस्य स्पर्शं कुर्वन्तु, यस्य नामकथनं अध्यापकः करोति। अत्र ध्यानं दातव्यं यत् अध्यापकः यत् अङ्गं स्पृशति, छात्रैः तस्य अङ्गस्य स्पर्शः न आवश्यकः। अस्मिन् विषये यः दोषम् आचरति, स बाह्यः भवति।

द्वादशः पाठः १२

सुभाषितानि

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।१।।



भावार्थः – यः अभिवादनशीलः भवति अर्थात् अन्येषां नमस्कार-प्रणामादिभिः सदैव अभिवादनं करोति एवं नित्यं वृद्धानां सेवां करोति, तस्य जीवने एतेषां (१. आयुः २. विद्या ३. यशः ४. बलम्) चतुर्णां वृद्धिः भवति।

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ।।२।।

भावार्थः – ईश्वरः अपि तस्य एव सहायतां करोति यः स्वयम् उद्यमशीलः (उद्योगी) साहसी, धैर्यवान्, बुद्धिमान्, शक्तियुक्तः पराक्रमी च भवति ।

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि सः ।।३।।



भावार्थः – सहस्रशः तारागणाः मिलित्वा अपि यम् अन्धकारं नाशयितुम् असमर्थाः भवन्ति, तम् एव अन्धकारम् एकः चन्द्रः नाशयति। यथा– सहस्रशः तारागणानाम् अपेक्षया एकः चन्द्रः उत्तमः भवति, तथा एव शतशः मूर्खपुत्राणाम् अपेक्षया एकः गुणी पुत्रः उत्तमः भवति ।



काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तकाले सम्प्राप्ते काकः काकः पिकः पिकः ।।४।।

भावार्थः – काकः अपि कृष्णवर्णीयः, पिकः (कोकिलः) अपि कृष्णवर्णीयः भवति ।रूपेण समानयोः एतयोः कोऽपि भेदः न दृश्यते, किन्तु यदा वसन्तकालः आगच्छति, तदा ज्ञायते यत् यः कर्कशध्वनिं करोति, सः काकः ।यः मधुरध्वनिं करोति, सः पिकः ।

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ।।५।।

भावार्थः – विद्वत्ता नृपता च कदापि समाने न भवतः यतोहि राजा (नृपः) तु केवलं स्वराज्ये एव पूजितो भवति, किन्तु विद्वान् सर्वत्र पूजितो भवति ।अतः विद्वत्ता एव श्रेष्ठा ।

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ।। ६ ।।

भावार्थः – यस्य पार्श्वे प्रज्ञा अर्थात् बुद्धिः नास्ति, शास्त्रम् तस्य किमपि साहाय्यं कर्तुं न शक्नोति ; यथा नेत्रहीनं जनं दर्पणः रूपं दर्शयितुं न शक्नोति ।

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।। ७ ।।

भावार्थः – गुणाः एव शरीरस्य शोभां वर्धयन्ति, अतः गुणाः एव आभूषणानि । यथा – हस्तस्य आभूषणं दानं भवति, कण्ठस्य आभूषणं सत्यभाषणं भवति, कर्णस्य आभूषणं शास्त्रश्रवणं भवति । एतानि आभूषणानि यस्य पार्श्वे भवन्ति, तस्य कृते स्वर्णादिभिः निर्मितानाम् आभूषणानां काऽपि आवश्यकता न भवति ।

अधमाः धनमिच्छन्ति धनं मानं च मध्यमाः ।
उत्तमाः मानमिच्छन्ति मानो हि महतां धनम् ।। ८ ।।

भावार्थः – संसारे त्रिविधाः जनाः भवन्ति – अधमाः मध्यमाः उत्तमाः च । अधमजनाः केवलं धनम् इच्छन्ति, मध्यमजनाः धनं सम्मानं च इच्छन्ति । उत्तमजनाः केवलं सम्मानम् इच्छन्ति, अतः सम्मानः एव

काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ।। ९ ।।



भावार्थः – श्रेष्ठविद्यार्थिनः पञ्च लक्षणानि भवन्ति – १. सः सफलतां प्राप्तुं काकः इव चेष्टां करोति । २. सः लक्ष्यस्य उपरि बकः इव ध्यानं करोति । ३. सः शुनकः इव सावधानः भूत्वा निद्रां करोति । ४. सः अल्पम् आहारं करोति । ५. सः अध्ययनार्थं गृहत्यागं करोति ।

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रम् अमित्रस्य कुतः सुखम् ।। १० ।।

भावार्थः – यः आलस्यं करोति, सः विद्यां प्राप्तुं न शक्नोति । यस्य पार्श्वे विद्या न भवति, सः धनं प्राप्तुं न शक्नोति । यस्य पार्श्वे धनं न भवति, तस्य कोऽपि जनः मित्रं न भवति । मित्ररहितः जनः कदापि सुखं न प्राप्नोति । अतः आलस्यस्य त्यागः करणीयः ।

अध्यापकाय निर्देशः –

। शिक्षकः कक्षायां सुभाषितानामोच्चारणं कारयन्तु येन विद्यार्थिनः कण्ठस्थीकृत्य श्रावयितुं समर्थाः भविष्यन्ति ।

शब्दार्थ:

शब्द:	सरलार्थ:	हिन्दी अर्थ
अभिवादनशीलस्य	नमस्कारादिस्वभावयुक्तस्य	नमस्कारादि अभिवादन करने वाले का
नित्यम्	सदा	हमेशा
वृद्धोपसेविन:	वृद्धजनानां सेवकस्य	वृद्धों (बुजुर्गों) की सेवा करने वाला
वर्धन्ते	वृद्धिं प्राप्नुवन्ति	बढ़ते हैं
यश:	कीर्ति:	प्रसिद्धि
बलम्	शक्ति:	ताकत
उद्यम:	उद्योग:	परिश्रम
वरमेको	एक: श्रेष्ठ:	एक श्रेष्ठ (है)
शतान्यपि	शतसंख्याका: अपि	सैकड़ों भी
तम:	अन्धकारम्	अन्धकार
हन्ति	नाशयति	नष्ट करता है
तारागणा:	नक्षत्र समूहा:	तारों का समूह
काक:	वायस:	कौआ
कृष्ण:	श्यामवर्णीय:	काला
पिक:	कोकिल:	कोयल
भेद:	भिन्नता	अन्तर
विद्वत्वम्	विद्वत्ता	विद्वत्ता
नृपत्वम्	नृपता	शासकता
तुल्यम्	समानम्	समान
कदाचन	कदाचित्	कभी
सर्वत्र	सर्वेषु स्थानेषु	सभी जगह
प्रज्ञा	बुद्धि:	बुद्धि
लोचनाभ्याम्	नेत्राभ्याम्	आँखों से
विहीनस्य	रहितस्य	रहित का
श्रोत्रस्य	कर्णस्य	कान का
अधमा:	नीचा:	नीच व्यक्ति
मानम्	सम्मानम्	सम्मान
महताम्	श्रेष्ठाणां	श्रेष्ठ
काकचेष्टा:	काक इव प्रयत्नशील:	कौए जैसा प्रयत्न वाला
बकध्यान:	बक इव ध्यानशील:	बगुले जैसा ध्यान वाला
श्वाननिद्र:	कुक्कुर इव निद्राशील:	कुत्ते जैसी नींद वाला

अभ्यासः

१. उच्चारणं कुरुत –

अभिवादनशीलस्य	वृद्धोपसेविनः	आयुर्विद्यायशोबलम्	मूर्खशतान्यपि
एकश्चन्द्रस्तमो	सम्प्राप्ते	विद्वत्वम्	नृपत्वम्
प्रज्ञा	लोचनाभ्याम्	श्रोत्रस्य	श्वाननिद्रस्तथैव।

२. उचित-उत्तरस्य क्रमाक्षरं कोष्ठके लिखत –

(अ) अभिवादनशीलस्य चतुर्षु किं न वर्धते –

(क) आयुः (ख) विद्या

(ग) यशः (घ) साहसम् ( )

(आ) मानः धनम् अस्ति –

(क) अधमानाम् (ख) उत्तमानाम्

(ग) मध्यमानाम् (घ) सर्वेषाम् ( )

(इ) सत्यं भूषणम् अस्ति –

(क) हस्तस्य (ख) नेत्रस्य

(ग) कण्ठस्य (घ) श्रोत्रस्य ( )

३. एकेन पदेन उत्तरत –

(क) विद्वान् कुत्र पूज्यते ?

(ख) काक – पिकयोः भेदः कदा ज्ञायते ?

(ग) हस्तस्य भूषणं किम् ?

(घ) के मानम् एव इच्छन्ति ?

(ङ) विद्यार्थिनः कति लक्षणानि ?

४. परस्परं सुमेलयत –

उद्यमः साहसं धैर्यं	न च मूर्खशतान्यपि
वरमेको गुणी पुत्रो	अमित्रस्य कुतः सुखम्
लोचनाभ्यां विहीनस्य	बुद्धिः शक्तिः पराक्रमः
अधनस्य कुतो मित्रम्	दर्पणः किं करिष्यति

५. रेखाङ्कितपदानाम् अशुद्धिसंशोधनं कृत्वा शुद्धं वाक्यं लिखत -

(क) काकः कृष्णः पिकः कृष्णं भवति ।

.....

(ख) लोचनाभ्यां विहिनात् दर्पणः किं करिष्यति ?

.....

(ग) श्रोत्रं भूषणं शास्त्रं भवति ।

.....

(घ) अधमः धनमिच्छन्ति ।

.....

६. अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -

	पदम्	विभक्तिः	वचनम्
यथा -	हस्तस्य	षष्ठी	एकवचनम्
(क)	उद्यमः	.....	.....
(ख)	धनम्	.....	.....
(ग)	कण्ठस्य	.....	.....
(घ)	विद्या	.....	.....
(ङ)	मानम्	.....	.....
(च)	तारागणाः	.....	.....
(छ)	काकयोः	.....	.....

योग्यता-विस्तारः

१. प्रियाः छात्राः ! यूयं अस्मिन् पाठे नीतिपूर्णान् दश श्लोकान् पठितवन्तः । संस्कृतसाहित्ये एतादृशानां नीतियुक्तानां श्लोकानाम् अतुल्यभण्डारः अस्ति । तेषाम् अन्वेषणेन अभ्यासेन च युष्माकं ज्ञाने योग्यतायां च वृद्धिः भविष्यति । अतः अधिकाधिकश्लोकानां सङ्ग्रहणाय प्रयासं कुरुत ।

२. केचन अन्य-श्लोकाः अत्र दीयन्ते, एतान् अपि पठत –

१. षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ।।

२. वृत्तं यत्नेन संरक्षेत्, वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणः, वृत्ततस्तु हतो हतः ।।

३. न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचित् रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ।।

३. अपरस्य श्लोकद्वयस्य सङ्ग्रहं कृत्वा अत्र लिखत –

१. .....
.....

२. .....
.....

४. एतत् अपि कुरुत –

यूयं श्लोकान् स्मृत्वा कर्गदफलकेषु लिखित्वा विद्यालयस्य भित्तिषु स्थापयत।

त्रयोदशः पाठः १३

गणतन्त्रदिवसः

(इकारान्त-पुँल्लिङ्गः, लृट्लकारः, अनुस्वारसंधिः)

(रविः स्वगृहे वस्त्राणां समीकरणं करोति। समीकरणेन सह एव सः गीतगायनस्य अभ्यासम् अपि करोति। तस्य कनिष्ठा भगिनी सुधा एतत् पश्यति। तदा सा रविं जिज्ञासापूर्वकं पृच्छति।)



सुधा- भ्रातः! त्वम् एतत् सर्वं किमर्थं करोषि ? कः विशेषः ?

रविः- सुधे! त्वं न जानासि ? श्वः जनवरीमासस्य षड्विंशतितमः दिनाङ्कः (२६ जनवरी)। अस्मिन् एव दिवसे अस्माकं भारतदेशस्य नूतनसंविधानस्य आरम्भः अभवत्। अतः प्रतिवर्षम् एतस्य दिनस्य आयोजनं गणतन्त्रदिवसरूपेण भवति। श्वः अस्माकं विद्यालये अपि समारोहः भविष्यति। अतः अहं तस्य कृते सज्जतां करोमि।

सुधा- अस्मिन् समारोहे किं किं भविष्यति ? के कार्यक्रमाः भविष्यन्ति ?

रविः- समारोहे बहवः कार्यक्रमाः भविष्यन्ति। सर्वप्रथमं प्रातः अष्टवादने अस्माकं प्रधानाचार्यः ध्वजारोहणं करिष्यति। ध्वजारोहणस्य पश्चात् वयं राष्ट्रगानं गास्यामः। दशमीकक्षायाः बालिकाः स्वागतगानस्य गायनं करिष्यन्ति। तत्पश्चात् वयं पथसञ्चलनं व्यायामप्रदर्शनं च करिष्यामः।

सुधा- समारोहे त्वं किं करिष्यसि ?

रविः- अहं हरिणा सह गीतस्य प्रस्तुतिं करिष्यामि। मम कक्षायाः छात्राः संस्कृतनाटिकायाः प्रदर्शनं करिष्यन्ति। तत्र अहं वेदव्यासमुनेः अभिनयं करिष्यामि।

सुधा- बहुशोभनम्। इतोऽपि किं किं भविष्यति?

रविः- राजस्थानस्य लोकगीतस्य उपरि नृत्यं भविष्यति। मम मित्रं नरेन्द्रः कवितापाठं करिष्यति। उत्तमानां छात्राणां कृते अतिथयः पुरस्कारान् दास्यन्ति। कार्यक्रमस्य अन्ते राष्ट्रगीतं भविष्यति। वयं उद्घोषवाक्यानि वदिष्यामः। सर्वेषां कृते मिष्टान्नवितरणं भविष्यति। तत्पश्चात् सर्वे गमिष्यन्ति।

सुधा- उत्तमम्! अहमपि श्वः विद्यालयं चलिष्यामि।

रविः- आम्। आवां अवश्यमेव सह एव चलिष्यावः।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
स्वगृहे	निजगेहे	अपने घर पर
समीकरणं	सम्यक्करणम्	इस्तरी करना
सह	साकम्	साथ
कनिष्ठा	लघ्वी	छोटी
भगिनी	स्वसा	बहिन
जिज्ञासापूर्वकम्	उत्सुकतापूर्वकम्	उत्सुकता से
किमर्थम्	किं निमित्तम्	किसलिए
श्वः	आगामिदिनम्	आने वाला कल
बहवः	अनेके	बहुत सारे
ध्वजारोहणम्	ध्वजस्य आरोहणम्	झण्डा फहराना
गास्यामः	गानं करिष्यामः	गायेंगे
पथसञ्चलनम्	मार्गप्रयाणम्	पथसंचलन (परेड)
मुनेः	ऋषेः	मुनि का
इतोऽपि	अन्यदपि	और भी
उपरि	ऊर्ध्वम्	ऊपर
अन्ते	समाप्ति-समये	अन्त में
उद्घोषवाक्यानि	जयघोषवाक्यानि	जयघोष (नारे)
अवश्यमेव	निश्चयेन	अवश्य ही

अभ्यासः

१. उच्चारणं कुरुत -

गणतन्त्रदिवसः	कनिष्ठा	जिज्ञासापूर्वकम्	पृच्छति
षड्विंशतितमः	नूतनसंविधानस्य	श्वः	ध्वजारोहणम्
वेदव्यासमुनेः	इतोऽपि	उद्घोषवाक्यानि	पथसञ्चलनम्

२. एकपदेन उत्तरत -

(क) रवेः कनिष्ठा भगिनी का ?

(ख) रविः केन सह गीतस्य प्रस्तुतिं करिष्यति ?

(ग) कार्यक्रमस्य अन्ते किं गीतं भविष्यति ?

(घ) नरेन्द्रः किं करिष्यति ?

३. पूर्णवाक्येन उत्तरत -

(क) रविः स्वगृहे किं करोति ?

(ख) दशमीकक्षायाः बालिकाः कस्य गायनं करिष्यन्ति ?

(ग) रवेः कक्षायाः छात्राः किं करिष्यन्ति ?

(घ) केषां कृते अतिथयः पुरस्कारान् दास्यन्ति ?

(ङ) नाटिकायां रविः कस्य अभिनयं करिष्यति ?

४. अधोलिखितानि एकवचनरूपाणि द्विवचने बहुवचने च लिखत-

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	रविः	रवी	रवयः
(क)	मुनिः	.....	.....
(ख)	कपिः	.....	.....
(ग)	ऋषिः	.....	.....
(घ)	हरिः	.....	.....

५. मञ्जूषातः उचित-अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत -

श्वः, ह्यः, अधुना, अद्य

(क) अहम् ..... गीताम् पठितवान्।

(ख) यूयम् ..... कुत्र गमिष्यथ ?

(ग) ..... गणतन्त्रदिवसस्य उत्सवः अस्ति ।

(घ) ..... देशः स्वतन्त्र अस्ति ।

६. अधोलिखितानि एकवचन-क्रियापदानि द्विवचने बहुवचने च लिखत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	गमिष्यति -	गमिष्यतः	गमिष्यन्ति
(क)	पठिष्यति -	.....	.....
(ख)	लेखिष्यति -	.....	.....
(ग)	चलिष्यति -	.....	.....
(घ)	नेष्यति -	.....	.....
(ङ)	पतिष्यति -	.....	.....

७. उदाहरणानुसारं सन्धिं कुरुत –

यथा –	फलम्	+	पतति	=	फलं पतति।
(क)	अहम्	+	गच्छामि	=	.....
(ख)	वयम्	+	पठामः	=	.....
(ग)	त्वम्	+	वदसि	=	.....
(घ)	पत्रम्	+	लिखति	=	.....
(ङ)	यूयम्	+	लिखथ	=	.....

८. प्रदत्तशब्दानां लृट्लकारस्य रूपाणि लिखत –

(क) प्रथमः पुरुषः

	धातुः	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा–	भव् (भू) –	भविष्यति	भविष्यतः	भविष्यन्ति
	खाद् –	खादिष्यति	.....	.....
	खेल् –	.....	खेलिष्यतः	.....
	गम् –	.....	.....	गमिष्यन्ति

(ख) मध्यमः पुरुषः

यथा–	भव् (भू) –	भविष्यसि	भविष्यथः	भविष्यथ
	खाद् –	खादिष्यसि	.....	.....
	खेल –	.....	खेलिष्यथः	.....
	गम् –	.....	.....	गमिष्यथ

(ग) उत्तमः पुरुषः

यथा–भव् (भू)	–	भविष्यामि	भविष्यावः	भविष्यामः
	खाद् –	खादिष्यामि	.....	.....
	खेल् –	.....	खेलिष्यावः	.....
	गम् –	.....	.....	गमिष्यामः

९. अधोलिखितानि वर्तमानकालरूपाणि भविष्यत्काले परिवर्तयत -

यथा-पठति	-	पठिष्यति	वदामि	-	वदिष्यामि
खादति	-	.....	खेलसि	-	.....
भवामि	-	.....	गच्छामः	-	.....
लिखन्ति	-	.....	करोति	-	.....
आगच्छथ	-	.....	वदावः	-	.....
पिबतः	-	.....	चलति	-	.....

१०. उदाहरणानुसारं भविष्यत्काल-वाक्यानि लिखत -

वर्तमानकाले	भविष्यत्काले	वर्तमानकाले	भविष्यत्काले
यथा-बालकः पठति।	बालकः पठिष्यति।	अहं खादामि।	अहं खादिष्यामि।
बालिका खादति।	.....।	सा लिखति।	.....।
वयं वदामः।	.....।	ते कुर्वन्ति।	.....।
त्वं खेलसि।	.....।	बालकाः गच्छन्ति।	.....।
अहं पश्यामि।	.....।	यूयं चलथ।	.....।

योग्यता-विस्तारः

१. ध्यानेन पश्यत, पठत अवगच्छत च -



आकाशे मेघाः सन्ति।
वृष्टिः भविष्यति ।



एषः लघुपादपः अस्ति।
एषः वृक्षः भविष्यति ।



अद्यः शनिवासरः अस्ति ।
श्वः रविवासरः भविष्यति ।
अहं श्वः विद्यालयं न गमिष्यामि।



श्वः श्लोकपाठ-स्पर्धा भविष्यति ।
अहं श्लोकान् वदिष्यामि ।

२. एषः भविष्यत्काल-प्रयोगः। भविष्यत्कालस्य क्रियायाः प्रदर्शनार्थं संस्कृते लृट्लकारस्य प्रयोगः भवति। लृट्लकारस्य रूपाणि अनेन प्रकारेण प्रचलन्ति –

पठ् धातुः लृट्लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पठिष्यति	पठिष्यतः	पठिष्यन्ति
मध्यमः पुरुषः	पठिष्यसि	पठिष्यथः	पठिष्यथ
उत्तमः पुरुषः	पठिष्यामि	पठिष्यावः	पठिष्यामः

यथा वर्तमानकालार्थे लट्लकारस्य रूपाणां प्रयोगः कृतः, तथा एव भविष्यत्कालार्थे लृट्लकारस्य रूपाणां प्रयोगः भवति। उपरि पठ्धातोः रूपाणि पठितानि।

३. कतिपय-धातूनां लृट्लकारस्य प्रथमपुरुष-एकवचनरूपाणि अधः प्रदत्तानि सन्ति। एतानि ध्यानेन पठत –

धातुः	लट्लकारः (वर्तमानकालः)	लृट्लकारः (भविष्यत्कालः)	धातुः	लट्लकारः (वर्तमानकालः)	लृट्लकारः (भविष्यत्कालः)
आगम्	आगच्छति	आगमिष्यति	वद्	वदति	वदिष्यति
पा (पिब्)	पिबति	पास्यति	दृश्	पश्यति	द्रक्ष्यति
चल्	चलति	चलिष्यति	नी	नयति	नेष्यति

४. अस्मिन् पाठे यूयम् इकारान्त-पुँल्लिङ्गशब्दानाम् अपि प्रयोगं दृष्टवन्तः। येषां पुँल्लिङ्गशब्दानाम् अन्ते 'इ' (इकारः) भवति, ते इकारान्त-पुँल्लिङ्गशब्दाः भवन्ति। पश्यत –

ह् + अ + र् + इ = हरि (हरि + : = हरिः)

र् + अ + व् + इ = रवि (रवि + : = रविः)

ग् + इ + र् + इ = गिरि (गिरि + : = गिरिः)

म् + उ + न् + इ = मुनि (मुनि + : = मुनिः)

५. एते सर्वे इकारान्त-पुँल्लिङ्गशब्दाः सन्ति। एतेषां प्रथमा-द्वितीया-षष्ठी-विभक्तिषु रूपाणि एवं प्रचलन्ति –

प्रथमा विभक्तिः

शब्दः	एकवचनम्	द्विवचनम्	बहुवचनम्
हरि –	हरिः	हरी	हरयः
रवि –	रविः	रवी	रवयः
गिरी –	गिरिः	गिरी	गिरयः
मुनि –	मुनिः	मुनी	मुनयः

द्वितीया विभक्ति :

शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
हरि	-	हरिम्	हरी	हरीन्
रवि	-	रविम्	रवी	रवीन्
गिरी	-	गिरिम्	गिरी	गिरीन्
मुनि	-	मुनिम्	मुनी	मुनीन्

षष्ठी विभक्तिः

शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
हरि	-	हरेः	हर्योः	हरीणाम्
रवि	-	रवेः	रव्योः	रवीनाम्
गिरि	-	गिरेः	गिर्योः	गिरीणाम्
मुनि	-	मुनेः	मुन्योः	मुनीनाम्

परिशिष्टस्य साहाय्येन अन्यासां विभक्तीनां रूपाणि अपि जानीत।

६. (ं) एतत् चिह्नं संस्कृतभाषायाम् 'अनुस्वारः' इति कथ्यते। सामान्यतः अनुस्वारस्य प्रयोगः 'म्' इत्यस्य स्थाने भवति।

यथा - अहम् - अहं
त्वम् - त्वं
रामम् - रामं

वाक्ये अनुस्वार-प्रयोगस्य एकः नियमः अस्ति । शब्दस्य अन्ते स्थितस्य 'म्' इत्यस्य पश्चात् यदि व्यञ्जनवर्णः भवति, तर्हि 'म्' इत्यस्य स्थाने अनुस्वारः (ं) भवति ।

यथा - (क) त्वम् + गच्छसि = त्वं गच्छसि।
(ख) अहम् + पठामि = अहं पठामि।
(ग) वयम् + लिखामः = वयं लिखामः।
(घ) फलम् + पतति = फलं पतति।

किन्तु यदि 'म्' इत्यस्य पश्चात् स्वरवर्णः भवति, तर्हि किमपि परिवर्तनं न भवति।

यथा - (क) त्वम् + असि = त्वम् असि।
(ख) अहम् + इच्छामि = अहम् इच्छामि।
(ग) पुस्तकम् + अस्ति = पुस्तकम् अस्ति।
(घ) अहम् + अस्मि = अहम् अस्मि।


अध्यापकाय निर्देशः -

- अध्यापकः अन्येषां धातूनां लृट्लकार-रूपाणाम् अभ्यासं प्रयोगं च कारयेत्।
- इकारान्त-पुँल्लिङ्गशब्दानां प्रथमा-द्वितीया-षष्ठीविभक्तीनां रूपाणां सामान्यपरिचयं कारयेत्।
- परिशिष्टे प्रदत्तानां लृट्लकारस्य इकारान्त-पुँल्लिङ्गशब्दानां च रूपाणाम् अपि अभ्यासं कारयेत्।

चतुर्दशः पाठः १४

आम्लं द्राक्षाफलम्

(अव्ययप्रयोगः)



एकः शृगालः

एकः शृगालः वनं गच्छति।

पिपासा, तस्य बुभुक्षा

पिपासया बुभुक्षया च सः वनं गच्छति

सः वनं गच्छति, सः वनं गच्छति।

तत्र गच्छति, किमपि न लभते

इतोऽपि गच्छति, किमपि न लभते

श्रान्तः जायते, खिन्नः जायते

किं च करोति ? सः किं च करोति ?

वामतः पश्यति, दक्षिणतः पश्यति

अग्रतः पश्यति, पृष्ठतः पश्यति

स्वेदः जायते, तृषा जायते

तस्य स्वेदः जायते, तृषा जायते

किं च पश्यति ? सः किं च पश्यति ?


पश्यति द्राक्षालतां

सः पश्यति द्राक्षाफलम्

उपरि उपरि लतासु दृश्यते च तत्फलम्

अनुक्षणं तन्मुखे रसः जायते

किं च करोति? सः किं च करोति ?



एकवारम् उत्पतति, द्विवारम् उत्पतति

त्रिवारम् उत्पतति, पुनः पुनः उत्पतति

स्वेदः जायते, तस्य श्रमः जायते।

किं कथयति? सः किं कथयति?

आम्लं द्राक्षाफलम्

आम्लं द्राक्षाफलम्

इत्येवं कथयति पलायते

इत्येवं कथयति पलाऽऽयते ।।

– डॉ. नारायणभट्ट

अध्यापकाय निर्देशः -

। अध्यापकः कक्षायां कथायाः सस्वरवाचनं कारयेत् येन विद्यार्थिनः कथां कण्ठस्थीकृत्य श्रावयितुं समर्थाः भविष्यन्ति।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
शृगालः	जम्बुकः/जम्बूकः	सियार
पिपासा	पातुम् इच्छा	प्यास
बुभुक्षा	खदितुम् इच्छा	भूख
लभते	प्राप्नोति	प्राप्त करता है
इतोऽपि	अस्मात् अपि	यहाँ से भी
श्रान्तः	क्लान्तः	थका हुआ
खिन्नः	दुःखितः	दुःखी
वामतः	वामपार्श्वे	बायीं ओर
दक्षिणतः	दक्षिणपार्श्वे	दायीं ओर
अग्रतः	अग्रभागे	आगे
पृष्ठतः	पृष्ठभागे	पीछे
स्वेदः	स्वेदबिन्दव :	पसीना
तृषा	पिपासा	प्यास
द्राक्षालताम्	द्राक्षालतिकाम्	अंगूर की बेल को
द्राक्षाफलम्	फलविशेषः	अंगूर
उपरि-उपरि	अधिकम् ऊर्ध्वम्	बहुत ऊपर
अनुक्षणम्	तत्समये	उसी समय
तन्मुखे	तस्य आनने	उसके मुँह में
उत्पतति	उच्छलति	उछलता है
पलायते	पलायनं करोति	भाग जाता है (चला जाता है)
आम्लं	अम्लतायुक्तम्	खट्टा

अभ्यासः

१. उच्चारणं कुरुत -

शृगालः	बुभुक्षया	इतोऽपि	श्रान्तः
खिन्नः	द्राक्षालताम्	अनुक्षणम्	उत्पतति।

२. एकपदेन उत्तरत -

(क) शृगालः कुत्र गच्छति?

(ख) कः श्रान्तः जायते?

(ग) शृगालः किं पश्यति?

(घ) कीदृशं द्राक्षाफलम्?

३. एकवाक्येन उत्तरत -

(क) शृगालः कथं वनं गच्छति?

(ख) खिन्नो भूत्वा शृगालः कुत्र-कुत्र पश्यति?

(ग) लतासु फलम् कुत्र दृश्यते?

(घ) किं कथयित्वा शृगालः पलायते?

४. रिक्तस्थानानि पूरयत -

(क) पिपासया ..... च सः वनं गच्छति।

(ख) श्रान्तः जायते, ... जायते।

(ग) स्वेदः जायते तस्य ..... जायते।

(घ) अनुक्षणं तन्मुखे ..... जायते।

५. अव्ययपदानां प्रयोगेण वाक्यनिर्माणं कुरुत -

यथा-(क) वामतः - बालिका वामतः चलति।

(ख) दक्षिणतः - .....

(ग) उपरि - .....

(घ) तत्र - .....

(ङ) इतः - .....

६. परस्परं सुमेलयत–

(क) वामतः पश्यति	पुनः पुनः उत्पतति
(ख) एकः शृगालः	पलायते
(ग) त्रिवारम् उत्पतति	दक्षिणतः पश्यति
(घ) इत्येवं कथयति	वनं गच्छति

७. क्रियापदानां रूपाणि लिखत –

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा –	गच्छति	गच्छतः	गच्छन्ति
(क)	.....	पश्यतः	.....
(ख)	उत्पतति	.....	.....
(ग)	.....	.....	कथयन्ति
(घ)	.....	चलतः	.....
(ङ)	खादति	.....	.....

योग्यता-विस्तारः

अस्मिन् पाठे भवन्तः गीतस्य माध्यमेन कथायाः आनन्दं प्राप्तवन्तः स्युः। गीते तत्र, च, किम्, इतोऽपि इत्यादयः शब्दाः अपि मध्ये मध्ये सन्ति। एते अव्ययशब्दाः सन्ति।

येषां शब्दानां सप्तसु विभक्तिषु, त्रिषु लिङ्गेषु, त्रिषु वचनेषु च रूपं समानं भवति, ते अव्ययशब्दाः भवन्ति।

आगच्छन्तु, प्रमुखाणाम् अव्ययशब्दानां विषये जानीमः –

अव्ययशब्दः	हिन्दी अर्थ	वाक्यप्रयोगः
अत्र	यहाँ	पुस्तकम् अत्र अस्ति।
तत्र	वहाँ	द्वारं तत्र अस्ति।
अन्यत्र	दूसरी जगह	चिकित्सालयः अन्यत्र अस्ति।
सर्वत्र	सब जगह	ईश्वरः सर्वत्र अस्ति।
कुत्र	कहाँ	लेखनी कुत्र अस्ति?
च	और	बालकः बालिका च पठतः।
अपि	भी	सः धावति। अहम् अपि धावामि।
इव	के समान	लतामङ्गेशकरः कोकिला इव गायति।
प्रातः	सुबह	सूर्योदयः प्रातः भवति।
सायम्	शाम	बालकः सायं पूजां करोति।

सर्वदा	हमेशा	अहं सर्वदा सत्यं वदामि।
इदानीम्	अब	इदानीं वयं गच्छामः।
अद्य	आज	अद्य गुरुवासरः अस्ति।
श्वः	कल (आने वाला)	श्वः शुक्रवासरः भविष्यति।
ह्यः	कल (बीता हुआ)	ह्यः बुधवासरः आसीत्।
किम्	क्या	बालकः किं पठति?
कथम्	कैसे	भवतः स्वास्थ्यं कथम् अस्ति?

आगच्छन्तु, वयं खेलामः

अस्मिन् पाठे भवन्तः पठितवन्तः यत् शृगालः द्राक्षाफलं खादितुं प्रयासं करोति। भवन्तः अपि विविधफलानि खादन्ति एव। फलैः सह अन्यान् खाद्यपदार्थान् अपि खादन्ति। एकादशपाठस्य योग्यता-विस्तारे भवन्तः खाद्यपदार्थानां नामानि पठितवन्तः। तेषाम् आधारेण वयम् एकां क्रीडां कुर्मः -

खादामः

सर्वे छात्राः मण्डलाकारे उपविशन्ति।

अध्यापकः सूचयति-'अहं विविधवस्तूनां नामानि वदिष्यामि। यदा अहं खाद्यपदार्थानां नामानि वदिष्यामि, तदा भवन्तः हस्तौ उपरि कृत्वा 'खादामः' इति वदिष्यन्ति। किन्तु यदि खाद्यपदार्थस्य स्थाने अहम् अन्यपदार्थस्य नाम वदामि तर्हि भवन्तः हस्तौ उपरि न कृत्वा मौनपूर्वकं तिष्ठन्तु।

अधुना अध्यापकः एकम् एकं कृत्वा खाद्यपदार्थानां नामानि उच्चारयति। यथा- रोटिका, पायसम्, ओदनम् इत्यादीनि।

छात्राः हस्तौ उपरि कृत्वा 'खादामः' इति वदन्ति। अध्यापकः मध्ये-मध्ये खाद्यपदार्थानां स्थाने अन्यवस्तूनां नामानि वदति। यथा- पुस्तकम्, व्यजनम्, उत्पीठिका इत्यादीनि। तदा छात्राः मौनपूर्वकं तिष्ठन्तु।


अस्यां क्रीडायां यः छात्रः खाद्यपदार्थानाम् उच्चारणसमये हस्तौ उपरि कृत्वा 'खादामः' इति न वदति सः बाह्यः भवति। एवमेव यः छात्रः अन्यवस्तूनां नामोच्चारणसमये त्रुटिवशात् 'खादामः' इति वदति अथवा हस्तौ उपरि करोति, सः अपि बाह्यः भवति।

पञ्चदशः पाठः १५

रघोः उदारता

(उकारान्त-पुँल्लिङ्गशब्दाः)

प्राचीनकालस्य वार्ता अस्ति । एकः रघुः नामकः नृपः भवति । सः स्वस्य सर्वं धनं 'विश्वजित्-यज्ञे' दानं करोति। रघोः पार्श्वे केवलं मृत्तिका-पात्राणि अवशिष्टानि भवन्ति । तस्मिन् एव समये गुरोः वरतन्तोः शिष्यः कौत्सः तत्र आगच्छति । रघुः कौत्सस्य आतिथ्यं करोति । तत्पश्चात् महाराजः रघुः कौत्सम् आगमनस्य प्रयोजनं पृच्छति । कौत्सः रघुं वदति - ''हे रघो ! भवान् जानाति एव यत् विद्यासमापनसमये गुरूणां कृते दक्षिणाप्रदानं शिष्याणां कर्तव्यम् अस्ति । मम अपि गुरुकुलस्य शिक्षा सम्पन्ना ।



अधुना अहम् अपि गुरोः वरतन्तोः कृते दक्षिणां दातुम् इच्छामि । मम गुरुः वरतन्तुः पूर्णतया तृष्णारहितः अस्ति । अतः सः तु दक्षिणारूपेण किमपि न इच्छति । किन्तु अहं गुरवे दक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः दातुम् इच्छामि । अहं चिन्तयामि यत् भवान् मम सहायतां करिष्यति । किन्तु अधुना भवान् एव स्वर्णपात्राणां स्थाने मृत्तिकापात्राणां प्रयोगं करोति। एतद् भवतः धनाभावं सूचयति । अतः अहं चिन्तयामि यत् भवान् मम सहायतां कर्तुं न शक्नोति । अहम् अन्यत्र गच्छामि ।''



रघुः कौत्सस्य वार्तां श्रुत्वा कथयति- ''हे कौत्स ! भवान् अन्यत्र मा गच्छतु । यद्यपि सम्प्रति यज्ञे सर्वस्वदानात् भवतः गुरुदक्षिणार्थं मम पार्श्वे धनं नास्ति । किन्तु अहं प्रयासं करिष्यामि । भवान् द्विदिवसपर्यन्तं मम यज्ञशालायां निवासं करोतु ।'' रघोः वार्तां श्रुत्वा कौत्सः तत्रैव तिष्ठति ।

रघुः कौत्सस्य सहायतायाः उपायं चिन्तयति । सः विचारयति ''कुबेरः धनपतिः अस्ति । तस्योपरि आक्रमणं कृत्वा अहं पर्याप्तं धनं प्राप्तुं शक्नोमि । अतः प्रातःकाले कुबेरस्योपरि आक्रमणं करिष्यामि ।''

यदा कुबेरः रघोः निश्चयं शृणोति तदा सः भीतः भवति । भयवशात् कुबेरः रात्रिकाले एव रघोः कोषे सुवर्णवृष्टिं करोति । प्रातः कोषरक्षकः कोषे अत्यधिकं सुवर्णं पश्यति । झटिति एव सः रघुं सूचयति ।

महाराजः रघुः तस्मिन् एव समये कौत्सम् आह्वयति । सर्वं सुवर्णं दातुम् इच्छति । किन्तु कौत्सः कथयति, ''हे महाराज ! गुरुदक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः एव इच्छामि । ततः अधिकं न स्वीकरिष्यामि ।'' तदा रघुः कौत्सस्य कृते चतुर्दशकोटिस्वर्णमुद्राः ददाति ।

कौत्सः रघवे आशीर्वादं ददाति, स्वगुरोः आश्रमं प्रति गच्छति ।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
नृपः	राजा	राजा
स्वस्य	निजस्य	अपना
पार्श्वे	समीपे	पास में
मृत्तिका-पात्राणि	मृद्भाजनानि	मिट्टी के बर्तन
अवशिष्टानि	शेष-भूतानि	बचे हुए
प्रयोजनम्	उद्देश्यम्	उद्देश्य

सम्पन्ना	सम्पूर्णा	सम्पूर्ण हुई
तृष्णारहितः	इच्छारहितः	इच्छारहित
गुरवे	आचार्याय	गुरु के लिए
कोटि	शतलक्षपरिमितम्	करोड़ों
पात्राणाम्	भाजनानाम्	बर्तनों के
धनाभावम्	धनस्य न्यूनताम्	धन की कमी को
चिन्तयामि	विचारयामि	सोचता हूँ
शक्नोति	अर्हति	सकता है
अन्यत्र	अन्यस्मिन् स्थाने	दूसरी जगह पर
श्रुत्वा	श्रवणं कृत्वा	सुनकर
तत्रैव	तस्मिन् एव स्थाने	वहाँ पर ही
प्राप्तुं	स्वीकर्तुम्	प्राप्त करने के लिए
भयवशात्	भीतिकारणात्	डर के कारण से
कोषे	धनभण्डारे	खजाने में
सुवर्णवृष्टिम्	स्वर्णवर्षाम्	सोने की वर्षा को
कोषरक्षकः	कोषस्य रक्षकः	खजाने का रखवाला
झटिति	शीघ्रम्	जल्दी से
सूचयति	सूचनां ददाति	सूचना देता है
आह्वयति	आह्वानं करोति	बुलाता है

अभ्यासः

१. उच्चारणं कुरुत –

विश्वजित्	अवशिष्टानि	मृत्तिका	आतिथ्यसत्कारम्
विद्यासमापनसमये	तृष्णारहितः	सुवर्णमुद्रा	गुरुदक्षिणार्थम्
द्विदिवसपर्यन्तम्	कुबेरस्योपरि	कोषरक्षकः	आह्वयति

२. एकपदेन उत्तरत–

(क) रघुः कस्मिन् यज्ञे सर्वस्वं धनं दानं करोति ?

(ख) कौत्सः कस्य शिष्यः अस्ति ?

(ग) कुबेरः कस्य वृष्टिं करोति ?

(घ) कस्य भयवशात् कुबेरः सुवर्णवृष्टिं करोति ?

(ङ) कौत्सः रघवे किं ददाति ?

३. पूर्णवाक्येन उत्तरत -

(क) कौत्सः कः अस्ति ?

(ख) विद्यासमापनसमये शिष्याणां किं कर्तव्यम् भवति ?

(ग) गुरुदक्षिणारूपेण कौत्सः किं दातुम् इच्छति ?

(घ) रघोः निश्चयं श्रुत्वा कुबेरः किं करोति ?

(ङ) प्रातःकाले कोषरक्षकः कोषे किं पश्यति ?

४. सत्यकथनस्य समक्षे 'आम्' इति असत्यकथनस्य समक्षे 'न' इति लिखत -

यथा - रघुः कौत्सस्य आतिथ्यं करोति । (आम्)

(क) कौत्सः वरतन्तोः शिष्यः अस्ति । ( )

(ख) अश्वमेधयज्ञे रघुः सर्वस्वं दानं करोति । ( )

(ग) लक्ष्मीः कोषागारे सुवर्णवृष्टिं करोति । ( )

(घ) रघुः चतुर्दशकोटि-सुवर्णमुद्राः ददाति । ( )

(ङ) कौत्सः द्विदिवसपर्यन्तं राजभवने निवासं करोति । ( )

५. उदाहरणं दृष्ट्वा वचनरूपाणि लिखत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	रघुः	रघू	रघवः
(क)	.....	गुरू	.....
(ख)	पशुः	.....	.....
(ग)	.....	.....	विधवः
(घ)	ऋतुः	.....	.....
(ङ)	.....	विभू	.....

योग्यता-विस्तारः

१. अस्मिन् पाठे यूयम् उकारान्त-पुँल्लिङ्गशब्दानां प्रयोगं दृष्टवन्तः । येषां पुँल्लिङ्गशब्दानाम् अन्ते 'उ' (उकारः) भवति, ते उकारान्त- पुँल्लिङ्गशब्दाः भवन्ति ।

पश्यत –

ग् + उ + र् + उ = गुरु (गुरु + : = गुरुः)

भ् + आ + न् + उ = भानु (भानु + : = भानुः)

र् + अ + घ् + उ = रघु (रघु + : = रघुः)

व् + इ + भ् + उ = विभु (विभु + : = विभुः)

एते सर्वे उकारान्त-पुँल्लिङ्गशब्दाः सन्ति । एतेषां प्रथमा-द्वितीया-षष्ठी-विभक्तिषु रूपाणि एवं प्रचलन्ति –

प्रथमा विभक्तिः

शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
गुरु	–	गुरुः	गुरू	गुरवः
भानु	–	भानुः	भानू	भानवः
रघु	–	रघुः	रघू	रघवः

द्वितीया विभक्तिः

शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
गुरु	–	गुरुम्	गुरू	गुरून्
भानु	–	भानुम्	भानू	भानून्
रघु	–	रघुम्	रघू	रघून्

षष्ठी-विभक्तिः

शब्दः		एकवचनम्	द्विवचनम्	बहुवचनम्
गुरु	–	गुरोः	गुर्वोः	गुरूणाम्
भानु	–	भानोः	भान्वोः	भानूनाम्
रघु	–	रघोः	रघ्वोः	रघूणाम्

२. एवम् एव अन्येषाम् उकारान्तपुँल्लिङ्गशब्दानाम् अभ्यासं कुरुत ।

अध्यापकाय निर्देशः –

। अध्यापकः उकारान्त-पुँल्लिङ्गशब्दानां प्रथमा-द्वितीया-षष्ठी-विभक्तीनां प्रमुखतया अभ्यासं कारयेत् । अन्यासाम् अपि विभक्तीनां रूपाणां परिशिष्टसाहाय्येन सामान्यपरिचयं कारयेत् ।

षोडशः पाठः १६

सूक्तयः

सत्यमेव जयते नानृतम् ।। १ ।।

– सत्यस्य एव विजयः भवति, असत्यस्य विजयः कदापि न भवतिः। अतः सर्वदा सत्यम् एव वदामः।

हितं मनोहारि च दुर्लभं वचः ।। २ ।।


– अस्मिन् संसारे हितकरं मनोहरं च वचनं दुर्लभमेव अस्ति।

विद्या ददाति विनयम् ।। ३ ।।

– विद्या एव विनयशीलतां ददाति अर्थात् यः शिक्षां प्राप्नोति स एव विनम्रः भवति।

माताः भूमिः पुत्रोऽहं पृथिव्याः ।। ४ ।।

– अस्मान् माता पालयति लालयति च तथैव पृथ्वी अपि अस्मान् पालयति लालयति च। अतः वयं सर्वे अस्याः पृथिव्याः पुत्राः स्मः। भूमिः अस्माकं सर्वेषां माता अस्ति। अतः एषा सर्वदा पूज्या।



जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।। ५ ।।

– या अस्मान् जनयति सा जननी (माता) भवति। यत्र च अस्माकं जन्म भवति, सा जन्मभूमिः भवति। माता जन्मभूमिः च स्वर्गलोकाद् अपि श्रेष्ठा भवति।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।।६ ।।

– यत्र नारीणां सम्मानः भवति तत्र देवाः प्रसन्नाः भवन्ति। यत्र नारीणां सम्मानः न भवति तत्र देवताः अपि प्रसन्नाः न भवन्ति। अतः वयं सर्वदा नारीणां सम्मानं कुर्मः।

सङ्घे शक्तिः कलौ युगे।। ७ ।।

– एषः युगः कलियुगः अस्ति। कलौ युगे सङ्गठने एव शक्तिः भवति। अतः वयं सदैव परस्परं मिलित्वा सङ्गठितरूपेण कार्यं कुर्मः।

श्रद्धावान् लभते ज्ञानम् ।। ८ ।।

- यः पूर्वजानां स्मरणं, अग्रजानाम् आज्ञापालनं सम्मानं च करोति सः श्रद्धावान् भवति। एतादृशः श्रद्धावान् एव श्रेष्ठं ज्ञानं प्राप्नोति।

ज्ञानं भारः क्रियां विना ।। ९ ।।

- केवलं ज्ञानप्राप्तिः एव पर्याप्तं न भवति। ज्ञानेन सह कार्यमपि आवश्यकम्। कार्यं (क्रियां) विना ज्ञानम् अपि भारः इव भवति।

आज्ञा गुरूणां ह्यविचारणीया ।। १० ।।

- यः शिक्षयति, बोधयति, ज्ञानं प्रददाति अन्धकारस्य च नाशं करोति स एव गुरुः। गुरुजनाः सर्वदा छात्राणां हितम् एव कुर्वन्ति। अतः गुरुजनानाम् आज्ञा अवश्यं पालनीया। (न विचारणीया अपितु पालनीया । विचारार्थं न भवति अपितु पालनार्थम् एव भवति।)

यत्नं विना रत्नं न लभ्यते ।। ११ ।।

- यत्नः अर्थात् प्रयासः। प्रत्येकं कार्यं प्रयासेन एव सफलं भवति। अतः प्रयासं विना रत्नस्य (बहुमूल्यपदार्थस्य) प्राप्तिः अपि असम्भवा ।

क्रोधो मूलमनर्थानाम् ।। १२ ।।

- क्रोधः = कोपः। क्रोधः अस्माकं शत्रुः अस्ति। यः क्रोधं करोति सः स्वस्य एव हानिं (अनर्थं) करोति। अनर्थस्य (हानेः) मुख्यं कारणं क्रोध एव भवति। अतः कदापि क्रोधः न करणीयः।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
अनृतम्	असत्यम्	झूठ
दुर्लभम्	दुष्प्राप्यम्	कठिनता से प्राप्त
पृथिव्याः	भूमेः	धरती का
जननी	माता	जन्म देने वाली माता
स्वर्गादपि	स्वर्गलोकात्	स्वर्ग से भी
गरीयसी	महीयसी	बढ़कर
यत्र	यस्मिन्	जहाँ
नार्यस्तु	स्त्रियः	नारियाँ
रमन्ते	रमणं कुर्वन्ति	विचरण करते हैं

तत्र	तस्मिन् स्थाने	वहाँ
सङ्घे	सङ्घटने	संगठन में
कलौ युगे	कलियुगे	कलियुग में
श्रद्धावान्	श्रद्धायुक्तः	जो श्रद्धा से युक्त हो
लभते	प्राप्नोति	प्राप्त करता है
गुरूणां	गुरुजनानाम्	गुरुजी का
ह्यविचारणीया	न चिन्तनीया	विचार नहीं की जानी चाहिए
यत्नम्	प्रयासम्	प्रयास
मूलम्	मुख्यकारणम्	मुख्य कारण
अनर्थानाम्	अनिष्टानाम्	हानियों का

अभ्यासः

१. उच्चारणं कुरुत -

नानृतम्	दुर्लभम्	ददाति	पुत्रोऽहं
पृथिव्याः	जन्मभूमिसश्च	नार्यस्तु	श्रद्धावान्
गुरूणाम्	ह्यविचारणीया	अनर्थानाम्	स्वर्गादपि

२. एकपदेन उत्तरत -

(क) किं न जयते?

(ख) विद्या किं ददाति?

(ग) अनर्थानाम् मूलं कः?

(घ) कः ज्ञानं लभते?

(ङ) केषाम् आज्ञा हि विचारणीया?

३. एकवाक्येन उत्तरत -

(क) कीदृशं वचः दुर्लभम्?

(ख) जननी जन्मभूमिश्च कस्मात् गरीयसी?

(ग) देवताः कुत्र रमन्ते?

(घ) कां विना ज्ञानं भारः भवति?

(ङ) यत्नं विना किं न लभ्यते?

४. परस्परं सुमेलयत –

(क) माता भूमिः	कलौ युगे।
(ख) सङ्घे शक्तिः	अनर्थानाम्।
(ग) हितं मनोहारि च	पुत्रोऽहं पृथिव्याः।
(घ) क्रोधो मूलम्	नानृतम्।
(ङ) सत्यमेव जयते	दुर्लभं वचः।

५. मञ्जूषायां प्रदत्तशब्दानां प्रयोगेण रिक्तस्थानानि पूरयत –

पूज्यन्ते, गरीयसी, ददाति, ज्ञानं, देवताः,जननी

(क) विद्या ..... विनयम्।

(ख) ..... भारः क्रियां विना।

(ग) यत्र नार्यस्तु ..... रमन्ते तत्र ....।

(घ) ..... जन्मभूमिश्च स्वार्गादपि गरीयसी।

६. प्रदत्तानाम् अव्ययपदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत –

यथा – च – रामः गणेशः च आगच्छतः।

(क) न – .....।

(ख) तत्र – .....।

(ग) विना – .....।

(घ) यत्र – .....।

(ङ) एव – .....।

७. कोष्ठकात् उचित-पदस्य प्रयोगं कृत्वा सूक्तिं पूरयत –

(क) माता ..... पुत्रोऽहं पृथिव्याः। (भूमिम्/भूमिः/भूमयः)

(ख) ..... शक्तिः कलौ युगे। (सङ्घे/सङ्घम्/सङ्घस्य)

(ग) यत्नं विना रत्नम् ..... लभ्यते। (एव/च/न)

(घ) जननी जन्मभूमिश्च ..... अपि गरीयसी। (स्वर्गात्/स्वर्गस्य/स्वर्गम्)

(ङ) हितं मनोहारि च ..... वचः। (दुर्लभेन/दुर्लभम्/दुर्लभस्य)

योग्यता-विस्तारः

१. प्रियाः छात्राः ! अस्मिन् पाठे यूयं संस्कृतसूक्तीनाम् अध्ययनं कृतवन्तः। संस्कृतभाषायाम् अनेकाः सूक्तयः सन्ति। सामान्यजीवने अपि जनाः एतासां सूक्तीनां प्रयोगं कुर्वन्ति। अनेकाः सूक्तयः तु विभिन्न-संस्थानां विभागानां च ध्येयवाक्यरूपेण अपि प्रयुज्यन्ते। यथा - 'सत्यमेव जयते' इति अस्माकं भारतसर्वकारस्य ध्येयवाक्यम् अस्ति।

सूक्तीनां प्रयोगेण भाषायां विशिष्टता आगच्छति। अतः सूक्तीनां स्मरणं प्रयोगं च अवश्यमेव करणीयः। युष्माकं कृते काश्चन अन्याः सूक्तयः अत्र सन्ति -

(क) लोभः पापस्य कारणम्। (ख) नास्ति विद्यासमं चक्षुः।

(ग) विद्याधनं सर्वधनप्रधानम्। (घ) बुद्धिर्यस्य बलं तस्य।

(ङ) आचारः परमो धर्मः। (च) प्रारब्धम् उत्तमजनाः न परित्यजन्ति।

(छ) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।

⇨ **एतत् अपि कुरुत -**

- यूयं सूक्तीनां स्मरणं कृत्वा कर्गदफलके लिखित्वा कक्षायाः भित्तिषु स्थापयत।

अध्यापकाय निर्देशः -

। अध्यापकः एतासां सूक्तीनाम् अर्थम् अपि बोधयेत्।

आगच्छन्तु, वयं खेलामः

प्रियाः छात्राः ! युष्माभिः द्वादशे पाठे सुभाषितानि पठितानि, एवञ्च अस्मिन् पाठे सूक्तयः पठिताः। एतेषाम् आधारेण वयम् एकां क्रीडां कुर्मः -

सूक्तिकथन-क्रीडा

अध्यापकः छात्राणां गणद्वयं करोति। एकः गणः द्वितीयगणस्य सम्मुखे उपविशति। प्रथमगणस्य एकः छात्रः एकां सूक्तिम् अथवा एकं सुभाषितं वदति। यथा- सत्यमेव जयते नानृतम्। द्वितीयगणस्य एकः छात्रः काम् अपि अन्यां सूक्तिम् अथवा अन्यत् सुभाषितं वदति। अनेन एव क्रमेण छात्राः सूक्तिवाक्यानि सुभाषितानि च वदन्ति। अत्र ध्यानं दातव्यं यत् सूक्तीनां सुभाषितानां च पुनरावृत्तिः न भवेत्। सूक्तीनां सुभाषितानां च उच्चारणं स्पष्टं पूर्णं च भवेत्। यः गणः सूक्तिम् अथवा सुभाषितं वक्तुं न शक्नोति, तस्य गणस्य पराजयः भवति।

परिशिष्टम्

१. कारक-परिचयः

क्रियान्वयित्वं कारकत्वम्। अर्थात् यस्य सम्बन्धः साक्षात् क्रियया सह भवति तत् कारकम् इति कथ्यते। कारकाणि षड् भवन्ति। (सम्बन्धः कारकं नास्ति।) किन्तु विभक्तयः सप्त भवन्ति।

विभक्तयः	कारकाणि	चिह्नानि
प्रथमा	कर्ता	ने
द्वितीया	कर्म	को
तृतीया	करणम्	से, द्वारा
चतुर्थी	सम्प्रदानम्	के लिए
पञ्चमी	अपादानम्	से (अलग होने के अर्थ में)
षष्ठी	सम्बन्धः	का, के, की, रा, रे, री
सप्तमी	अधिकरणम्	में, पर
सम्बोधन		भोः, अरे, हे

(१) कर्तृकारकम् (प्रथमा-विभक्तिः)

यथा-

रामः पठति।
सुहानी गच्छति।
छात्राः हसन्ति।
छात्रा लिखति।
सः आगच्छति।
त्वं खादसि।
यूयं पठथ।
अहं हसामि।
वयं गच्छामः।
तौ खादतः।

(२) कर्मकारकम् (द्वितीया-विभक्तिः)

यथा-

रामः विद्यालयं गच्छति।
सा पुस्तकं पठति।
त्वं फलं खादसि।
अहम् आपणं गच्छामि।
वयं वस्त्राणि क्षालयामः।

(३) करणकारकम् (तृतीया-विभक्तिः)

यथा- रामः कलमेन लिखति।

त्वं कारयानेन गच्छसि।

सः हस्तेन खादति।

बालिका तुलया तोलयति।

(४) सम्प्रदानकारकम् (चतुर्थी-विभक्तिः)

यथा- राजा याचकाय धनं ददाति।

गुरवे नमः।

शिक्षिका बालिकायै पुस्तकं ददाति।

सरस्वत्यै नमः।

(५) अपादानकारकम् (पञ्चमी-विभक्तिः)

यथा- वृक्षात् पत्रं पतति।

हिमालयात् गङ्गा प्रभवति।

नागपर्वतात् लवणवती (लूणी) प्रभवति।

नगरात् युवकः निर्गच्छति।

(६) सम्बन्धः (षष्ठी-विभक्तिः)

यथा- वसुदेवस्य पुत्रः कृष्णः अस्ति।

राजस्थानराज्यस्य राजधानी जयपुरम् अस्ति।

सौरपरिवारस्य प्रमुखः सूर्यः।

उदयसिंहस्य धात्री पन्ना।

बालकस्य प्रथमः गुरुः माता।

काकस्य वर्णः कोकिलसमानः।

(७) अधिकरणकारकम् (सप्तमी-विभक्तिः)

यथा- खगः वृक्षे निवसति।

भारतवर्षे नवविंशतिः राज्यानि सन्ति।

उदयपुरे फतहसागरकासारः (झील) अस्ति।

सुधाखण्डः हस्ते अस्ति।

२. शब्दरूपाणि

संज्ञा-शब्दाः

अकारान्त-पुँल्लिङ्गः ''बालक'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालकः	बालकौ	बालकाः
द्वितीया	बालकम्	बालकौ	बालकान्
तृतीया	बालकेन	बालकाभ्याम्	बालकैः
चतुर्थी	बालकाय	बालकाभ्याम्	बालकेभ्यः
पञ्चमी	बालकात्	बालकाभ्याम्	बालकेभ्यः
षष्ठी	बालकस्य	बालकयोः	बालकानाम्
सप्तमी	बालके	बालकयोः	बालकेषु
सम्बोधनम्	हे बालक !	हे बालकौ !	हे बालकाः !

एवमेव देवः, नरः, वृक्षः, ग्रामः, दीपः, गजः इत्यादयः रूपाणि भवन्ति।

आकारान्त-स्त्रीलिङ्गः ''माला'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	माला	माले	मालाः
द्वितीया	मालाम्	माले	मालाः
तृतीया	मालया	मालाभ्याम्	मालाभिः
चतुर्थी	मालायै	मालाभ्याम्	मालाभ्यः
पञ्चमी	मालायाः	मालाभ्याम्	मालाभ्यः
षष्ठी	मालायाः	मालयोः	मालानाम्
सप्तमी	मालायाम्	मालयोः	मालासु
सम्बोधनम्	हे माले !	हे माले !	हे मालाः !

एवेमव बालिका, शाला, लता, मापिका, गीता इत्यादयः रूपाणि भवन्ति।

अकारान्त - नपुंसकलिङ्गः ''फल'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	फलम्	फले	फलानि
द्वितीया	फलम्	फले	फलानि
तृतीया	फलेन	फलाभ्याम्	फलैः
चतुर्थी	फलाय	फलाभ्याम्	फलेभ्यः
पञ्चमी	फलात्	फलाभ्याम्	फलेभ्यः
षष्ठी	फलस्य	फलयोः	फलानाम्
सप्तमी	फले	फलयोः	फलेषु
सम्बोधनम्	हे फल !	हे फले !	हे फलानि !

एवमेव - गृहम्, ज्ञानम्, वनम्, पुष्पम्, चित्रम्, पुस्तकम् इत्यादयः रूपाणि भवन्ति।

इकारान्त - पुँल्लिङ्गः ''मुनिः'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	मुनिम्	मुनी	मुनीन्
तृतीया	मुनिना	मुनिभ्याम्	मुनिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पञ्चमी	मुनेः	मुनिभ्याम्	मुनिभ्यः
षष्ठी	मुनेः	मुन्योः	मुनीनाम्
सप्तमी	मुनौ	मुन्योः	मुनिषु
सम्बोधनम्	हे मुने !	हे मुनी !	हे मुनयः !

इकारान्त - पुँल्लिङ्ग ''कपिः'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कपिः	कपी	कपयः
द्वितीया	कपिम्	कपी	कपीन्
तृतीया	कपिना	कपिभ्याम्	कपिभिः
चतुर्थी	कपये	कपिभ्याम्	कपिभ्यः
पञ्चमी	कपेः	कपिभ्याम्	कपिभ्यः
षष्ठी	कपेः	कप्योः	कपीनाम्
सप्तमी	कपौ	कप्योः	कपिषु
सम्बोधनम्	हे कपे !	हे कपी !	हे कपयः !

एवमेव - कपिः, हरिः, ऋषिः, कविः, रविः इत्यादयः रूपाणि भवन्ति।

उकारान्त - पुँल्लिङ्ग ''भानुः'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भानुः	भानू	भानवः
द्वितीया	भानुम्	भानू	भानून्
तृतीया	भानुना	भानुभ्याम्	भानुभिः
चतुर्थी	भानुवे	भानुभ्याम्	भानुभ्यः
पञ्चमी	भानोः	भानुभ्याम्	भानुभ्यः
षष्ठी	भानोः	भान्वोः	भानूनाम्
सप्तमी	भानौ	भान्वोः	भानुषु
सम्बोधनम्	हे भानो !	हे भानू !	हे भानवः !

उकारान्त - पुँल्लिङ्गः ''गुरुः'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गुरुः	गुरू	गुरवः
द्वितीया	गुरुम्	गुरू	गुरून्
तृतीया	गुरुणा	गुरुभ्याम्	गुरुभिः
चतुर्थी	गुरवे	गुरुभ्याम्	गुरुभ्यः
पञ्चमी	गुरोः	गुरुभ्याम्	गुरुभ्यः
षष्ठी	गुरोः	गुर्वोः	गुरूणाम्
सप्तमी	गुरौ	गुर्वोः	गुरुषु
सम्बोधनम्	हे गुरो !	हे गुरु !	हे गुरवः !

एवमेव - प्रभुः, तरुः, साधुः इत्यादयः रूपाणि भवन्ति।

सर्वनामशब्दरूपाणि

अवधेयम्- सर्वनामशब्देषु सम्बोधनरूपाणि न भवन्ति।

पुँल्लिङ्ग ''तद्'' (तत्) शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सः	तौ	ते
द्वितीया	तम्	तौ	तान्
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

स्त्रीलिङ्गः ''तद्'' (तत्) शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सा	ते	ताः
द्वितीया	ताम्	ते	ताः
तृतीया	तया	ताभ्याम्	ताभिः
चतुर्थी	तस्यै	ताभ्याम्	ताभ्यः
पञ्चमी	तस्याः	ताभ्याम्	ताभ्यः
षष्ठी	तस्याः	तयोः	तासाम्
सप्तमी	तस्याम्	तयोः	तासु

नपुंसकलिङ्गः ''तद्'' (तत्) शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तत्	ते	तानि
द्वितीया	तत्	ते	तानि
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

पुँल्लिङ्गः ''किम्'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कः	कौ	के
द्वितीया	कम्	कौ	कान्
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

स्त्रीलिङ्गः ''किम्'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	का	के	काः
द्वितीया	काम्	के	काः
तृतीया	कया	काभ्याम्	काभिः
चतुर्थी	कस्यै	काभ्याम्	काभ्यः
पञ्चमी	कस्याः	काभ्याम्	काभ्यः
षष्ठी	कस्याः	कयोः	कासाम्
सप्तमी	कस्याम्	कयोः	कासु

नपुंसकलिङ्ग ''किम्'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्	के	कानि
द्वितीया	किम्	के	कानि
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

त्रिलिङ्गकः ''अस्मद्'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अहम्	आवाम्	वयम्
द्वितीया	माम् , मा	आवाम् , नौ	अस्मान् , नः
तृतीया	मया	आवाभ्याम्	अस्माभिः
चतुर्थी	मह्यम् , मे	आवाभ्याम् , नौ	अस्मभ्यम् , नः
पञ्चमी	मत्	आवाभ्याम्	अस्मत्
षष्ठी	मम, मे	आवयोः, नौ	अस्माकम् , नः
सप्तमी	मयि	आवयोः	अस्मासु

त्रिलिङ्गकः ''युष्मद्'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	त्वम्	युवाम्	यूयम्
द्वितीया	त्वाम् , त्वा	युवाम् , वाम्	युष्मान् , वः
तृतीया	त्वया	युवाभ्याम्	युष्माभिः
चतुर्थी	तुभ्यम् , ते	युवाभ्याम् , वाम्	युष्मभ्यम् , वः
पञ्चमी	त्वत्	युवाभ्याम्	युष्मत्
षष्ठी	तव, ते	युवयोः, वाम्	युष्माकम् , वः
सप्तमी	त्वयि	युवयोः	युष्मासु

पुँल्लिङ्गः ''एतद् (एतत्)'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषः	एतौ	एते
द्वितीया	एतम्	एतौ	एतान्
तृतीया	एतेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः	एतेषु

स्त्रीलिङ्गः ''एतद् (एतत्)'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषा	एते	एताः
द्वितीया	एताम्	एते	एताः
तृतीया	एतया	एताभ्याम्	एताभिः
चतुर्थी	एतस्यै	एताभ्याम्	एताभ्यः
पञ्चमी	एतस्याः	एताभ्याम्	एताभ्यः
षष्ठी	एतस्याः	एतयोः	एतासाम्
सप्तमी	एतस्याम्	एतयोः	एतासु

नपुंसकलिङ्गः ''एतद् (एतत्)'' शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतत्	एते	एतानि
द्वितीया	एतत्	एते	एतानि

तृतीयातः सप्तमीपर्यन्तं पुँल्लिङ्गवद् रूपाणि भवन्ति।

३. धातुरूपाणि

पठ्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पठति	पठतः	पठन्ति
मध्यमः पुरुषः	पठसि	पठथः	पठथ
उत्तमः पुरुषः	पठामि	पठावः	पठामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पठिष्यति	पठिष्यतः	पठिष्यन्ति
मध्यमः पुरुषः	पठिष्यसि	पठिष्यथः	पठिष्यथ
उत्तमः पुरुषः	पठिष्यामि	पठिष्यावः	पठिष्यावः

लिख्-धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	लिखति	लिखतः	लिखन्ति
मध्यमः पुरुषः	लिखसि	लिखथः	लिखथ
उत्तमः पुरुषः	लिखामि	लिखावः	लिखामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति
मध्यमः पुरुषः	लेखिष्यसि	लेखिष्यथः	लेखिष्यथ
उत्तमः पुरुषः	लेखिष्यामि	लेखिष्यावः	लेखिष्यामः

गम् (गच्छ) धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	गच्छति	गच्छतः	गच्छन्ति
मध्यमः पुरुषः	गच्छसि	गच्छथः	गच्छथ
उत्तमः पुरुषः	गच्छामि	गच्छावः	गच्छामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	गमिष्यति	गमिष्यतः	गमिष्यन्ति
मध्यमः पुरुषः	गमिष्यसि	गमिष्यथः	गमिष्यथ
उत्तमः पुरुषः	गमिष्यामि	गमिष्यावः	गमिष्यामः

आगम्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	आगच्छति	आगच्छतः	आगच्छन्ति
मध्यमः पुरुषः	आगच्छसि	आगच्छथः	आगच्छथ
उत्तमः पुरुषः	आगच्छामि	आगच्छावः	आगच्छामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	आगमिष्यति	आगमिष्यतः	आगमिष्यन्ति
मध्यमः पुरुषः	आगमिष्यसि	आगमिष्यथः	आगमिष्यथ
उत्तमः पुरुषः	आगमिष्यामि	आगमिष्यावः	आगमिष्यामः

खाद्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	खादति	खादतः	खादन्ति
मध्यमः पुरुषः	खादसि	खादथः	खादथ
उत्तमः पुरुषः	खादामि	खादावः	खादामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	खादिष्यति	खादिष्यतः	खादिष्यन्ति
मध्यमः पुरुषः	खादिष्यसि	खादिष्यथः	खादिष्यथ
उत्तमः पुरुषः	खादिष्यामि	खादिष्यावः	खादिष्यामः

पा (पिब्) धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पिबति	पिबतः	पिबन्ति
मध्यमः पुरुषः	पिबसि	पिबथः	पिबथ
उत्तमः पुरुषः	पिबामि	पिबावः	पिबामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पास्यति	पास्यतः	पास्यन्ति
मध्यमः पुरुषः	पास्यसि	पास्यथः	पास्यथ
उत्तमः पुरुषः	पास्यामि	पास्यावः	पास्यामः

खेल्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	खेलति	खेलतः	खेलन्ति
मध्यमः पुरुषः	खेलसि	खेलथः	खेलथ
उत्तमः पुरुषः	खेलामि	खेलावः	खेलामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	खेलिष्यति	खेलिष्यतः	खेलिष्यन्ति
मध्यमः पुरुषः	खेलिष्यसि	खेलिष्यथः	खेलिष्यथ
उत्तमः पुरुषः	खेलिष्यामि	खेलिष्यावः	खेलिष्यामः

चल्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	चलति	चलतः	चलन्ति
मध्यमः पुरुषः	चलसि	चलथः	चलथ
उत्तमः पुरुषः	चलामि	चलावः	चलामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	चलिष्यति	चलिष्यतः	चलिष्यन्ति
मध्यमः पुरुषः	चलिष्यसि	चलिष्यथः	चलिष्यथ
उत्तमः पुरुषः	चलिष्यामि	चलिष्यावः	चलिष्यामः

वद्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	वदति	वदतः	वदन्ति
मध्यमः पुरुषः	वदसि	वदथः	वदथ
उत्तमः पुरुषः	वदामि	वदावः	वदामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	वदिष्यति	वदिष्यतः	वदिष्यन्ति
मध्यमः पुरुषः	वदिष्यसि	वदिष्यथः	वदिष्यथ
उत्तमः पुरुषः	वदिष्यामि	वदिष्यावः	वदिष्यामः

भ्रम्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	भ्रमति	भ्रमतः	भ्रमन्ति
मध्यमः पुरुषः	भ्रमसि	भ्रमथः	भ्रमथ
उत्तमः पुरुषः	भ्रमामि	भ्रमावः	भ्रमामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	भ्रमिष्यति	भ्रमिष्यतः	भ्रमिष्यन्ति
मध्यमः पुरुषः	भ्रमिष्यसि	भ्रमिष्यथः	भ्रमिष्यथ
उत्तमः पुरुषः	भ्रमिष्यामि	भ्रमिष्यावः	भ्रमिष्यामः

धाव्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	धावति	धावतः	धावन्ति
मध्यमः पुरुषः	धावसि	धावथः	धावथ
उत्तमः पुरुषः	धावामि	धावावः	धावामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	धाविष्यति	धाविष्यतः	धाविष्यन्ति
मध्यमः पुरुषः	धाविष्यसि	धाविष्यथः	धाविष्यथ
उत्तमः पुरुषः	धाविष्यामि	धाविष्यावः	धाविष्यामः

अस्-धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	अस्ति	स्तः	सन्ति
मध्यमः पुरुषः	असि	स्थः	स्थ
उत्तमः पुरुषः	अस्मि	स्वः	स्मः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	भविष्यति	भविष्यतः	भविष्यन्ति
मध्यमः पुरुषः	भविष्यसि	भविष्यथः	भविष्यथ
उत्तमः पुरुषः	भविष्यामि	भविष्यावः	भविष्यामः

नम्-धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	नमति	नमतः	नमन्ति
मध्यमः पुरुषः	नमसि	नमथः	नमथ
उत्तमः पुरुषः	नमामि	नमावः	नमामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	नंस्यति	नंस्यतः	नंस्यन्ति
मध्यमः पुरुषः	नंस्यसि	नंस्यथः	नंस्यथ
उत्तमः पुरुषः	नंस्यामि	नंस्यावः	नंस्यामः

दृश् (पश्य्) धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पश्यति	पश्यतः	पश्यन्ति
मध्यमः पुरुषः	पश्यसि	पश्यथः	पश्यथ
उत्तमः पुरुषः	पश्यामि	पश्यावः	पश्यामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
मध्यमः पुरुषः	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
उत्तमः पुरुषः	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः

पच्-धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पचति	पचतः	पचन्ति
मध्यमः पुरुषः	पचसि	पचथः	पचथ
उत्तमः पुरुषः	पचामि	पचावः	पचामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	पक्ष्यति	पक्ष्यतः	पक्ष्यन्ति
मध्यमः पुरुषः	पक्ष्यसि	पक्ष्यथः	पक्ष्यथ
उत्तमः पुरुषः	पक्ष्यामि	पक्ष्यावः	पक्ष्यामः

नी (नय्) धातुः, लट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	नयति	नयतः	नयन्ति
मध्यमः पुरुषः	नयसि	नयथः	नयथ
उत्तमः पुरुषः	नयामि	नयावः	नयामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	नेष्यति	नेष्यतः	नेष्यन्ति
मध्यमः पुरुषः	नेष्यसि	नेष्यथः	नेष्यथ
उत्तमः पुरुषः	नेष्यामि	नेष्यावः	नेष्यामः

क्षाल्-धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	क्षालयति	क्षालयतः	क्षालयन्ति
मध्यमः पुरुषः	क्षालयसि	क्षालयथः	क्षालयथ
उत्तमः पुरुषः	क्षालयामि	क्षालयावः	क्षालयामः

लृट्-लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	क्षालयिष्यति	क्षालयिष्यतः	क्षालयिष्यन्ति
मध्यमः पुरुषः	क्षालयिष्यसि	क्षालयिष्यथः	क्षालयिष्यथ
उत्तमः पुरुषः	क्षालयिष्यामि	क्षालयिष्यावः	क्षालयिष्यामः

उपविश् धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	उपविशति	उपविशतः	उपविशन्ति
मध्यमः पुरुषः	उपविशसि	उपविशथः	उपविशथ
उत्तमः पुरुषः	उपविशामि	उपविशावः	उपविशामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	उपवेक्ष्यति	उपवेक्ष्यतः	उपवेक्ष्यन्ति
मध्यमः पुरुषः	उपवेक्ष्यसि	उपवेक्ष्यथः	उपवेक्ष्यथ
उत्तमः पुरुषः	उपवेक्ष्यामि	उपवेक्ष्यावः	उपवेक्ष्यामः

उत्स्था-धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	उत्तिष्ठति	उत्तिष्ठतः	उत्तिष्ठन्ति
मध्यमः पुरुषः	उत्तिष्ठसि	उत्तिष्ठथः	उत्तिष्ठथ
उत्तमः पुरुषः	उत्तिष्ठामि	उत्तिष्ठावः	उत्तिष्ठामः

लृट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	उत्थास्यति	उत्थास्यतः	उत्थास्यन्ति
मध्यमः पुरुषः	उत्थास्यसि	उत्थास्यथः	उत्थास्यथ
उत्तमः पुरुषः	उत्थास्यामि	उत्थास्यावः	उत्थास्यामः

दाण् (यच्छ्) धातुः, लट्- लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	यच्छति	यच्छतः	यच्छन्ति
मध्यमः पुरुषः	यच्छसि	यच्छथः	यच्छथ
उत्तमः पुरुषः	यच्छामि	यच्छावः	यच्छामः

लृट् -लकारः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	दास्यति	दास्यतः	दास्यन्ति
मध्यमः पुरुषः	दास्यसि	दास्यथः	दास्यथ
उत्तमः पुरुषः	दास्यामि	दास्यावः	दास्यामः

४. व्यावहारिक-संस्कृत-शब्दावलिः

पुष्पाणि			पाठ्यवस्तूनि		
कमलम्	–	कमल	पुस्तकम्	–	पुस्तक
पाटलम्	–	गुलाब	लेखनी	–	कलम
कुन्दः	–	सफेद फूल	उत्तरपुस्तिका	–	कॉपी
चम्पकः	–	चम्पा	कर्गदम्	–	कागज
मालती	–	चमेली	मसी	–	स्याही
मल्लिका	–	बेला	अङ्किनी	–	पेन्सिल
यूथिका	–	जूही	घर्षकः	–	रबड़
शाकानि			**फलानि**		
आलुकम्	–	आलू	आम्रम्	–	आम
रक्ताङ्गम्	–	टमाटर	पालवेतम्	–	सेब
कुष्माण्डः	–	कद्दू	कदलीफलम्	–	केला
मूलकम्	–	मूली	जम्बूफलम्	–	जामुन
गृञ्जनम्	–	गाजर	दाडिमम्	–	अनार
भिण्डिका	–	भिण्डी	बिल्वम्	–	बेल फल
पालकः	–	पालक	कपित्थम्	–	कैथ का फल
वृन्ताकम्	–	बैंगन	द्राक्षाफलम्	–	अंगूर
कारवेल्लः	–	करेला	बदरीफलम्	–	बेर
मरीचिका	–	मिर्ची	नारिकेलम्	–	नारियल
अलाबुः	–	लौकी	नारङ्गम्	–	नारंगी

भोज्य पदार्थानि

अमृती	–	इमरती
माषगर्भा	–	कचौरी
ओदनम्	–	भात
पायसम्	–	खीर
कृसरः	–	खिचड़ी
अवदंशः	–	गजक
कुण्डलिका	–	जलेबी
दधिबटकः	–	दहीबड़ा
पक्ववटिका	–	पकौड़ी
पर्पटी	–	पपड़ी
पर्पटा	–	पापड़
अपूपः	–	पुआ
तक्रम्	–	छाछ
मिष्टान्नम्	–	मिठाई
मिष्टपाकः	–	मुरब्बा
राधेयम्	–	रायता
रसगोलकः	–	रसगुल्ला
रोटिका	–	रोटी
मोदकः	–	लड्डू
सूत्रकः	–	सेव
सूत्रिका	–	सेंवई
शष्कुली	–	पूरी
घृतपूरः	–	घेवर
अवलेहः	–	चटनी
अभ्यूषः	–	डबलरोटी

अन्नादिशब्दाः

आढकी	–	अरहर
माषः	–	उड़द
गोधूमः	–	गेहूँ
चणकः	–	चना
तण्डुलः	–	चावल
यवः	–	जौ
यवनालः	–	ज्वार
तिलः	–	तिल
द्विदलम्	–	दाल
प्रियङ्गु	–	बाजरा
वर्तुलः	–	मटर
मसूरः	–	मसूर
मुद्गः	–	मूँग
श्यामाकः	–	सावाँ

वृक्षाणि

आमलकी	–	आँवला
पनसः	–	कटहल
नीपः	–	कदम्ब
जम्बूः	–	जामुन
किंशुकः	–	ढाक
निम्बः	–	नीम
करीरः	–	बबूल
अश्वत्थः	–	पीपल
न्यग्रोधः	–	वट
मधूकः	–	महुआ
शींशपा	–	शीशम

वस्त्राणि

उष्णीषम्	–	पगड़ी
कञ्चुकः	–	कुर्ता
शाटिका	–	साड़ी
युतकम्	–	कमीज
पादयामः	–	पायजामा
करवस्त्रम्	–	रूमाल

दैनिकोपयोगीनि वस्तूनि

स्नानफेनकम्	–	नहाने का साबुन	वस्त्रफेनकम्	–	कपड़े धोने का साबुन
दन्तफेनकम्	–	दन्तमञ्जन	क्षालनचूर्णम्	–	धोने का पाउडर
व्यजनम्	–	पंखा	स्यूतः	–	थैला
छत्रम्	–	छाता	कर्तरी	–	कैंची
तालकम्	–	ताला	अग्निपेटिका	–	माचिस
चुल्लिका	–	चूल्हा	वायुचुल्लिका	–	गैस चूल्हा
चायम्	–	चाय	जलम्	–	पानी
भोजनम्	–	भोजन	दर्पणम्	–	दर्पण (काँच)

सम्बन्धवाचकशब्दाः

पिता	–	पिता
माता	–	माता
पितामहः	–	दादा
पितामही	–	दादी
मातामहः	–	नाना
मातामही	–	नानी
भ्राता	–	भाई
भगिनी	–	बहन
अग्रजः	–	बड़ा भाई
अग्रजा	–	बड़ी बहन
अनुजः	–	छोटा भाई
अनुजा	–	छोटी बहन
मातुलः	–	मामा
मातुलानी	–	मामी
पितृव्यः	–	चाचा
पितृव्या	–	चाची

५. इमानि अपि अवलोकयत

१. दूरदर्शनम् (डी.डी. न्यूज)

(क) वार्ता ६.५५ प्रात: प्रतिदिनम्

(ख) वार्तावली ७.०० सायं शनिवासरे (समय: परिवर्तनशील:)

(ग) वार्तावली पुन: ३.३० अपराह्णे बुधवासरे (समय: परिवर्तनशील:)

२. आकाशवाणी (आल इंडिया रेडियो) प्रात: सायं (प्रतिदिनम्)

३. वृत्तपत्राणि (मैगजींस)

क्रम-संख्या	नाम	प्रकाशनस्थलम्	आवृत्ति:
१.	सुधर्मा	चेन्नई	दैनिकम्
२.	गन्धवह:	दिल्ली	मासिक:
३.	ब्रजगन्धा	वृन्दावन:	मासिक:
४.	भारती	जयपुरम्	मासिक:
5.	सम्भाषण-सन्देश:	बंगलौर	मासिक:
६.	चन्दामामा	बंगलौर	मासिक:
७.	अभिव्यक्ति-सौरभम्	प्रयाग:	मासिक:
८.	स्वरमंगला	जयपुरम्	त्रैमासिकम्

4. समाचार-सन्देश-सुविधा

AIR<space>S इति सन्देशं 7738299899 प्रति प्रेषयित्वा स्वजङ्गमदूरवाणी संख्या (Mobile No.) पञ्जीकरणं करणीयम्। तेन प्रतिदिनं दैनिकवार्ता: संस्कृतमाध्यमेन जङ्गमदूरवाणीमध्ये सन्देशरूपेण आयान्ति। एतत् सुविधा नि:शुल्कं वर्तते।